This PDF you are browsing now is a digitized copy of rare books and manuscripts from the Jnanayogi Dr. Shrikant Jichkar Knowledge Resource Center Library located in Kavikulaguru Kalidas Sanskrit University Ramtek, Maharashtra.

KKSU University (1997- Present) in Ramtek, Maharashtra is an institution dedicated to the advanced learning of Sanskrit.
The University Collection is offered freely to the Community of Scholars with the intent to promote Sanskrit Learning.

Website
https://kksu.co.in/

Digitization was executed by NMM

https://www.namami.gov.in/

Sincerely,

Prof. Shrinivasa Varkhedi
Hon'ble Vice-Chancellor

Dr. Deepak Kapade
Librarian

Digital Uploaded by eGangotri Digital Preservation Trust, New Delhi
https://egangotri.wordpress.com/

शिर्षक	ग्रंथकार	विषय	विस्तार (पूर्ण/अपूर्ण)	विभाग	आकार	पृष्ठे	लिपी		Lines per page	Letters per line	Condition (नाक/विकन सवंत)	Additional Particulars / Remark
याज्ञवल्क्यस्मृतेराचाराभिधः प्रथमाध्याय	ज्ञानेश्वर भट्ट	धर्मशास्त्र	अपूर्ण	-	3/12	70	संस्कृत	कागद	11			

M-2901

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हिषव्यतिरेकेण आरण्यानांचसर्वेषांमृगाणांमहिषींविनेतिवचनात् अवेर्जातमाविकं वर्जयेदितिप्रत्येकंसंबध्यते ओष्ट्रमित्यादिविकारप्रत्ययनिर्देशात् तद्विकारमात्रस्यपयोमूत्रादेः सर्वदानिषेधः नित्यमाविकमपेयमौष्ट्रमेकशफंचेतिगौतमस्मरणात् १६९ देवतार्थंबल्युपहारनिमित्तं साधितंहविः हवनार्थंसिद्धंप्राक्होमात् शिग्रुः सौभांजनः लोहितानवृक्षनिर्यासान् व्रश्चनप्रभवान्वृक्षच्छेदनजातान् अलोहितानपि यथाहमनुः लोहितान्वृक्षनिर्यासान्व्रश्चनप्रभवांस्तथेति लोहितग्रहणात्हिंगुकर्पूरादीनामनिषेधः अनुपाकृतमांसानियज्ञेअहुतस्यपशोर्मांसानि विड्जानि

देवतार्थंहविः शिग्रुंलोहितान्व्रश्चनांस्तथा अनुपाकृतमांसानिविड्जानिकवकानिच १७० क्रव्यादपक्षिदात्यूहशुकप्रतुददिदृभान् सारसैकशफान्हंसान्सर्वांश्चग्रामवासिनः १७१ कोयष्टिप्लवचक्राङ्कबलाकाबकविष्किरान् वृथाकृशरसंयावपायसापूपशष्कुलीः १७२

मनुष्यादिजग्धबीजपुरीषोत्पन्नानिपुरीषस्थानेउत्पन्नानिच तंदुलीयकप्रभृतीनि कवकानिछत्राकाणि वर्जयेदितिप्रत्येकमभिसंबध्यते १७० क्रव्यादाआममांसादनशीलाः पक्षिणोगृध्रादयः दात्यूहश्चातकः शुकःकीरःचंचा प्रतुद्यभक्षयंतीतिप्रतुदाः श्येनादयः दिदृभस्तच्छब्दानुकारी सारसोलक्ष्मणः एकशफाअश्वादयः हंसाःप्रसिद्धाः ग्रामवासिनः पारावतप्रभृतयः एतान्क्रव्यादादीन्वर्जयेत् १७१ कोयष्टिकः क्रौंचः प्लवोजलकुक्कुटः चक्राङ्कश्चक्रवाकः बलाकाबकौप्रसिद्धौ नखैर्विकीर्यभक्षयंतीतिविष्किराश्चकारोदयएवगृह्यंते लावकमयूरादीनांभक्ष्यत्वात् ग्रामकुक्कुटस्यग्रामवासित्वादेवनिषेधात् एतान्कोयष्ट्यादीन्वर्जयेत् वृथादेवता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

युद्देशमंतरेणसाधिताः कृसरसंयावपायसापूपशष्कुलीवर्जयेत् कृसरंतिलमुद्गमिश्रओदनः संयावः क्षीरगुडघृतादिकृतः उत्करिकाख्यः पा
यसंपयसाभृतमन्नं अपूपः स्नेहपक्वगोधूमविकारः शष्कुलीस्नेहपक्वगोधूमविकारः नपचेदन्नमात्मनेइतिकृसरादीनांनिषेधेमिश्रेपुनरभि
धानंप्रायश्चित्तगौरवार्थं १७२ कलविंकोग्रामचटकः ग्रामनिवासित्वेनप्रतिषेधेमिश्रे सत्युभयचरत्वात्पुनर्वचनं काकोलोद्रोणकाकः कुरर
उत्क्रोशः रज्जुदालकोवृक्षकुट्टकः जालपादाः जालाकारपादाः अजालपादाअपिवैहंसाः संतीतिहंसानांपृथग्वचनं खंजरीटः खंजनः जानितो
येअज्ञातामृगाः पक्षिणश्चएतान्कलविंकादीन्वर्जयेत् १७३ चाषाः किकीदिवयः रक्तपादाः कादंबप्रभृतयः सौनंघातस्थानभवंमांसं भ

कलविंकंसंकाकोलंकुररंरज्जुदालकम् जालपादान्खंजरीटानज्ञातांश्चमृगद्विजान् १७३
चाषांश्चरक्तपादांश्चसौनंवल्लूरमेवच मत्स्यांश्चकामतोजग्ध्वासोपवासस्त्र्यहंवसेत् १७४

क्ष्याणामपिवल्लूरंशुष्कमांसं मत्स्यामीनाः एतांश्चाषादीन्वर्जयेत् चकारान्नालिकाशणकुसुंभादीन् नालिकाशणछत्राककुसुंभालाबुविड्वरान्
कुंभीकंदुकदृंताककोविदारांश्चवर्जयेदिति तथाकालप्रकृदानिपुष्पाणिचफलानिच विकारवच्चयत्किंचित्त्यत्नेनविवर्जयेत् तथावटप्लक्षाश्च
त्थकपित्थनीपमातुलिंगफलानिवर्जयेदितिस्मरणात् एतान्संधिनीक्षीरप्रभृतीननुक्तान्कामतोभक्षयित्वात्रिरात्रमुपवसेत् अकामतस्त्वहो
रात्रं शेषेषूपवसेदहरितिमनुस्मरणात् यत्पुनःशंखेनोक्तं बकबलाकाहंसप्लवचक्रवाककारंडवगृध्रचटककपोतपारावतपांडुशुकसारिकामा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रसदृष्टिभोलूककंकरक्तपादचाषभासवायसकोकिलशाङ्गलिकुक्कुटहारीतभक्षणेद्वादशरात्रमनाहारः पिबेद्गोमूत्रयावकमिति तद्बहुकालाभ्यासेमतिपूर्वंसमस्तभक्षणेवावेदितव्यं १७४ पलांडुः स्थूलकंदनालोलशुनानुकारी विड्वराहोग्रामसूकरः छत्राकंसर्पच्छत्रं ग्रामकुक्कुटः प्रसिन्द्रः लशुनरसोनंसूक्ष्मश्वेतकंदनालं गृंजनंलशुनानुकारिलोहितसूक्ष्मकंदं एतानिषट्सकृत्कामतोजग्ध्वाभक्षयित्वाचांद्रायणंवक्ष्यमाणलक्षणंचरेत् ग्रामकुक्कुटछत्राकयोः पूर्वंप्रतिषेधितयोरिहाभिधानं पलांडुादिसमानप्रायश्चित्तार्थं मतिपूर्वंचिरतराभ्यासेनुछत्राकंविड्वरा

पलांडुंविड्वराहंचछत्राकंग्रामकुक्कुटम् लशुनंगृंजनंचैवजग्ध्वाचांद्रायणंचरेत् १७५ भक्ष्याः पंचनखाःसेधाणे
धाकच्छपशल्लकाः शशश्चमत्स्येष्वपिहिंसिहनुंडकरोहिताः १७६ तथापाठीनराजीवसशल्काश्चाहिजातिभिः -
अतःशृणुध्वंमांसस्यविधिंभक्षणवर्जने १७७

हंचलशुनंग्रामकुक्कुटं पलांडुंगृंजनंचैवमत्याजग्ध्वापतेद्विजइतिमनूक्तं
अमतिपूर्वाभ्यासे अमत्यैतानिषड्जग्ध्वाकृच्छ्रंसांतपनंचरेत् तृतीयाध्यायेवक्ष्यमाणंयतिचांद्रायणंवापीतिद्रष्टव्यं अमतिपूर्वाभ्यासेतुशं
खोक्तं लशुनपलांडुगृंजनविड्वराहग्रामकुक्कुटकुंभीकभक्षणेद्वादशरात्रंपयः पिबेदिति १७५ सेधाश्वाविन् गोधाकलासानुकारिणीम
हतीकच्छपः कूर्मः शल्लकः शल्लकी शशः प्रसिन्द्रः पंचनखादीनांश्वमार्जारगोनरादीनांमध्येसेधादयोभक्ष्याः चकारात्खड्गोपि यथाहगौत
मः पंचनखाः शशशल्लकश्वाविद्गोधाखड्गकच्छपाइति मनुरपि श्वाविधंशल्लकंगोधांखड्गकूर्मशशांस्तथा भक्ष्यान्पंचनखेष्वाहुरनुष्ट्रांश्चै

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कलोदनइति यत्पुनर्वसिष्ठेन खड्गेतुविवदंतइत्यभक्ष्यत्वमुक्तं तच्छ्राद्धादन्यत्र खड्गमांसेभवेदन्नमक्षय्यंपितृकर्मणीतिश्राद्धफलेश्रुतिद
र्शनात् तथामत्स्यानांमध्येसिंहतुंडादयोभक्ष्याः सिंहतुंडःसिंहमुखः रोहितोलोहितवर्णः पाठीनश्चंद्राख्यः राजीवः पद्मवर्णः सहशल्कैः
शुल्क्याकारैर्वर्तनइतिसशल्कः एतेचसिंहतुंडादयोनियुक्ताएवभक्ष्याः पाठीनरोहितावाद्यौनियुक्तौहव्यकव्ययोः राजीवाःसिंहतुंडा
श्चसशल्काश्चैवसर्वशइतिमनुस्मरणात् द्विजातिग्रहणंशूद्रव्युदासार्थं अनर्चितंवृथामांसमित्यारभ्यद्विजातिधर्मानुक्त्वेदानींचातुर्व
र्ण्यधर्मानाह मांसस्यप्रोक्षितादेर्भक्षणेतद्व्यतिरिक्तस्यवानिषिद्धस्यवर्जनेप्रोक्षितादिव्यतिरेकेणमांसंनभक्षयामीत्येवंसंकल्परूपेणवि

प्राणात्ययेतथाश्राद्धेप्रोक्षितंद्विजकाम्यया देवान्पितॄन्समभ्यर्च्यखादन्मांसंनदोषभाक् १७८

धिंसामश्रवः प्रभृतयः हेमुनयःशृणुध्वं १७६ १७७ तत्रभक्षणेविधिंदर्शयति अन्नाभावेनव्याध्यभिभवेनवामांसभक्षणमंतरेणय
दाप्राणबाधाभवतितदामांसंनियमेनभक्षयेत् सर्वतएवात्मानंगोपायेदित्यात्मरक्षणविधानात् तस्मादिहनपुरायुषःस्यःकामीप्रेयादिति
मरणनिषेधाच्च तथाश्राद्धेमांसंनिमंत्रितोनियमेनभक्षयेत् अभक्षणेदोषश्रवणात् यथाविधिनियुक्तस्तुयोमांसंनात्तिमानवः संप्रेत्य
पशुतांयातिसंभवानेकविंशतिमितिमनुस्मरणात् प्रोक्षणाद्यश्रौतसंस्कारसंस्कृतस्यपशोर्यागार्थस्याग्नीषोमीयादेर्हुतावशिष्टमांसंप्रो-
क्षितंतद्भक्षयेत् अभक्षणाद्यागानिष्पत्तेः द्विजकाम्ययाब्राह्मणभोजनार्थंदेवपित्रर्थंचयत्साधितंतेनतानभ्यर्च्यावशिष्टंभक्षयन्नदोष-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भाग्भवति एवंभृत्यभरणावशिष्टमपि यज्ञार्थंब्राह्मणैर्वध्याः प्रशस्तामृगपक्षिणः भृत्यानांचैववृत्त्यर्थमगस्त्योल्लाचरत्तथेतिमनुस्मरणात् नदोषभागितिदोषाभावमात्रंवदताऽनित्यार्चनावशिष्टस्याभ्यनुज्ञामात्रंनप्रोक्षितादिवन्नियमइतिदर्शितं एवमप्रतिषिद्धानामपिशशादीनांप्राणात्ययादिव्यतिरेकेणाभक्ष्यत्वावगमात् शूद्रस्यापिमांसप्रतिबद्धसर्वविधिनिषेधाधिकारोवगम्यते १७८ इदानींप्रोक्षितादिव्यतिरिक्तस्यवृथामांसमित्यनेनप्रतिषिद्धस्यभक्षणेनिंदार्थवादमाह अविधिनादेवाद्युद्देशमंतरेणयःपशून्हंति सतस्यपशोर्यावंतिरोमाणितावंतिदिनानिघोरेनरकेवसेत् हंतीत्यष्टविधोपिघातकोगृह्यते यथाहमनुः अनुमंताविशसितानिहंताक्रयविक्रयी संस्कर्ताचोपहर्ता

वसेत्सनरकेघोरेदिनानिपशुरोमभिः संमितानिदुराचारोयोहंत्यविधिनापशून् १७९
सर्वान्कामानवाप्नोतिहयमेधफलंतथा गृहेपिनिवसन्विप्रोमुनिर्मांसविवर्जनात् १८०

चरवादकश्चेतिघातकाइति १७९ इदानींवर्जनेविधिमाह यःप्रोक्षितादिव्यतिरेकेणमृगयामांसंनभक्षितव्यमितिसत्यसंकल्पोभवति समसर्वान्कामान् तत्साधनेप्रवृत्तोनिर्विघ्नंप्राप्नोति विशुद्धाशयत्वात् यथाहमनुः यस्त्र्यायतेयत्कुरुतेरतिंबध्नातियत्रच तदवाप्नोत्यविघ्नेनयोहिंसानसंनिकिंचनेति एतच्चानुषंगिकंफलं मुख्यंफलमाह हयमेधफलंतथेति एतच्चसांवत्सरिकसंकल्पस्यवर्षेवर्षेश्वमेधेनयोयजेतशतंसमाः मांसानिचनखादेद्यस्तयोःपुण्यफलंसममितिमनुस्मरणात् तथागृहेपिनिवसन्ब्राह्मणादिश्चातुर्वर्णिकोमुनिवन्माननीयो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भवनिर्मांसत्यागात् एतच्चनप्रतिषिद्धमांसविषयं नापिप्रोक्षितादिविषयं परिशेषादनित्याद्यर्चनावशिष्टाभ्यनुज्ञातविषयमिति इतिभक्ष्याभक्ष्यप्रकरणं

१८० इदानींद्रव्यशुद्धिमाह सोवर्णंसुवर्णकृतं राजतंरजतकृतं अब्जंमुक्ताफलशंखशुक्त्यादि ऊर्ध्वपात्रंयज्ञियोलूखलादि ग्रहादिसाह-
र्चान्तग्रहाः षोडशिप्रभृतयः अश्मादृषदादिः शाकंवास्तुकादि रज्जुः बल्वजादिनिर्मिता मूलमार्द्रकादि फलमाम्रादि वासोवस्त्रं बिदलं
वेणवादि चर्मअजादीनां बिदलचर्मणोर्ग्रहणंतद्विकाराणांछत्रवस्त्रादीनामुपलक्षणार्थं पात्राणिप्रोक्षणीपात्रप्रभृतीनि चमसाःहोतृचम
सादयः एतेषांसोवर्णादीनांलेपरहितानामुच्छिष्टस्पर्शमात्रेवारिणाप्रक्षालनेनशुद्धिः चरुचरुस्थाली स्रुक्स्रुवौप्रसिद्धौ सस्नेहानिपात्राणि

सोवर्णराजताब्जानामूर्ध्वपात्रग्रहाश्मनाम् शाकरज्जुमूलफलवासोबिदलचर्मणाम् १८१
पात्राणांचमसानांचवारिणाशुद्धिरिष्यते चरुस्रुक्स्रुवसस्नेहपात्राण्युष्णेनवारिणा १८२

प्राशित्रहरणादीनि एतानिचलेपरहितान्युष्णेनवारिणाशुद्ध्यंति निर्लेपंकांचनंभांडमद्भिरेवविशुध्यति अब्जमश्ममयंचैवराजतंचा
नुपस्कृतमितिमनुस्मरणात् अनुपस्कृतमस्रवातपूरितं सलेपानांतु तैजसानांमणीनांचसर्वस्याश्ममयस्यच भस्मनाद्भिर्मृदाचैवशु
द्धिरुक्तामनीषिभिरितिमनूक्तंद्रष्टव्यं मृद्भस्मनोरेककार्यत्वाद्विकल्पः आपस्तुसमुच्चीयंते काकादिमुखोपघातेतु कृष्णशकुनिमुखावघृष्टं
पात्रंनिर्लिखेत् श्वापदमुखावमृष्टंपात्रंनप्रयुंजीतेतिद्रष्टव्यं एतच्चमार्जारादन्यत्र मार्जारश्चैवदर्वीचमारुतश्चसदाशुचिरितिमनुस्मरणात्

१८१ १८२

CC-0. In Public Domain. Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्म्योवज्रः यज्ञांगंअनःशकटं शेषंप्रसिद्धं एतेषामुष्णेनवारिणाशुद्धिःपुनरजिनग्रहणंयज्ञांगाजिनप्राप्त्यर्थं संहतानामुक्तविशुद्धिर्व्यालब्धावयविनांबहूनांधान्यानांवाससांच वासोग्रहणमुक्तशुद्धीनामुपलक्षणार्थं उक्तशुद्धीनांधान्यवासःप्रभृतीनांबहूनांराशीकृतानांप्रोक्षणेनैवशुद्धिः बहुत्वंचस्पृष्टापेक्षया एतदुक्तंभवति यदाधान्यानिवस्त्रादीनिवाराशीकृतानि तत्रचांडालादिस्पृष्टान्यल्पानिबहूनिवास्पृष्टानि तत्रस्पृष्टानामुक्तेवशुद्धिरितरेषांप्रोक्षणमिति तथाचस्मृत्यंतरं वस्त्रधान्यादिराशीनामेकदेशस्पर्शदूषणात् तावन्मात्रंसमुद्धृत्यशे

स्म्यशूर्णाजिनधान्यानांमुसलोलूखलानसाम् प्रोक्षणंसंहतानांचबहूनांधान्यवाससाम् १८३

षंप्रोक्षणमर्हतीति यदापुनःस्पृष्टानांबहुत्वंअस्पृष्टानांचाल्पत्वंतदासर्वेषामेवक्षालनं यथाहमनुः अद्भिस्तुप्रोक्षणंशौचंबहूनांधान्यवाससां प्रक्षालनेनत्वल्पानामद्भिःशौचंविधीयतेइति स्पृष्टानामस्पृष्टानांचसमत्वेपिप्रोक्षणमेव बहूनांप्रोक्षणविधानेनाल्पानांक्षालनेनशुद्धिः पुनरल्पानांक्षालनवचनस्यसमेषुक्षालनवचननिवृत्यर्थात् इयत्स्पृष्टमियदस्पृष्टमित्यविवेकेतुक्षालनमेव पाक्षिकस्यापिदोषस्यपरिहर्तव्यात् अनेकपुरुषोद्धार्यमाणानांतुधान्यवासःप्रभृतीनांस्पृष्टानामस्पृष्टानांचप्रोक्षणमेवेतिनिबंधकृतः १८३ निर्लेपानांस्पर्शमात्रदुष्टानांशुद्धिमुक्त्वेदानींसलेपानांशुद्धिमाह दारूणांमेषमहिषादिमृगाणांकरिवाराहशंखवाद्यस्थां अस्थिग्रहणेनदंतानामपिग्रहणं उच्छिष्टस्नेहादिभिलिप्तानांमृद्भस्मोदकादिभिरनपगतलेपानां यावन्नापैत्यमेध्यक्लोगंधोलेपश्चतत्कृतः तावन्मृद्वारिवादेयंसर्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सुद्रव्यशुद्धिर्क्षितिसामान्यशुद्धिविधानात् तक्षणंतावन्मात्रावयवापनयनंशुद्धिः फलसंभवांबिल्वालाबुनारिकेलादिफलसंभूतानांपात्राणांगोवालेरुद्घर्षणाच्छुद्धिः यज्ञपात्राणांस्रुक्स्रुवादीनांयज्ञकर्मणिप्रयुज्यमानानांदक्षिणेनहस्तेनदर्भैर्दशापवित्रेणवायथाशास्त्रंकर्मांगतयामार्जनंकर्तव्यं एतच्चश्रोतमुदाहरणं अन्येषामपिसौवर्णादीनांपात्राणांस्मार्तलौकिककर्मसुकृतशौचानामेवांगत्वमितिदर्शयितुंयज्ञांगानांपुनःकृतशौचानामिददशापवित्रादिमार्जनंसंस्कारार्थमितिशेषः १८४ इदानीमलेपानामपकेषांचिल्लेपापकर्षणेविशेषहेतूनाह उत्तरमृत्तिकासहितेनगोमूत्रेणोदकेनबालेपापेक्षया आधिकमूर्णामयंकौशिकंकोशप्रभवंसरीपट्टादि प्रक्षालितंशुध्यति उद

तक्षणंदारुशृंगास्थ्नांगोवालेः फलसंभुवाम् मार्जनंयज्ञपात्राणांपाणिनायज्ञकर्मणि १८४
सोत्तरेणोदकगोमूत्रैःशुद्ध्त्याविककौशिकम् सश्रीफलैरंशुपट्टंसारिष्टैःकृतपतथा १८५

कगोमूत्रैरितिबहुवचनंपश्चादुदकप्राप्त्यर्थं अंशुपट्टंवल्कलतंतुकृतं सश्रीफलैः बिल्वफलसहितैः कृतपः पार्वतीयच्छागरोमनिर्मितकंबलः अरिष्टफलसहितैः फेनसहितैः उदकगोमूत्रैः शुध्यतीत्यनुवर्तते एतच्चोच्छिष्टस्नेहादियोगेसतिवेदितव्यं अल्पोपघातेतुप्रोक्षणादि क्षालनासहत्वात् सर्वत्रद्रव्याविनाशेनैवशुद्धेरिष्टत्वात् तथाचदेवलः ऊर्णाकौशेयकृतपपट्टक्षौमदुकूलजाः अल्पाशौचाभवंत्येतेशोषणप्रोक्षणादिभिरिति अभिधायाह तान्येवामेध्ययुक्तानिक्षालयेच्छोधनैःस्वकैः धान्यकल्कैस्तुफलजैरसैः क्षारातुगैरपी-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ति क्षौमवदेवशाणस्यसमानयोगत्वात् ऊर्णादिग्रहणंतदारब्धतूलिकादिप्राप्त्यर्थं अथतस्यात्योपघातेनैवक्षालनंकार्यं अमेध्यलेपादन्य
त्र तूलिकामुपधानंचपुष्परक्तांबरंतथा शोषयित्वातपेकिंचित्करैःसंमार्जयेन्मुहुः पश्चाच्चवारिणाप्रोक्ष्यविनियुंजीतकर्मणि तान्यष्यतिमलि
ष्टानियथावत्परिशोधयेदितिदेवलस्मरणात् पुष्परक्तानिकुंकुमकुसुंभादिरक्तानि पुष्परक्तग्रहणमन्यस्यापिहरिद्रादिरक्तस्यक्षालनासहत्व
प्राप्त्यर्थंनमांजिष्ठादेःतस्यक्षालनसहत्वात् शंखेनाप्युक्तं रागद्रव्याणिप्रोक्षितानिशुचीनीति १८५ गौरसर्षपसहितैरुद्वर्तकगोमूत्रैः क्षौमं -
क्षुमाअनसीतत्सूत्रनिर्मितंक्षौमंशुद्ध्यति पुनःपाकेनचमृन्मयघटादि एतच्चोच्छिष्टस्नेहलेपेवेदितव्यं मद्यमूत्रपुरीषैश्चश्लेष्मपूयास्रशोणितैः

सगौरसर्षपैः क्षौमंपुनःपाकान्महीमयम् कारुहस्तः शुचिःपण्यंभैक्ष्यंयोषिन्मुखंतथा १८६

संस्पृष्टेनैवशुद्धेनपुनःपाकेनमृन्मयमितिस्मरणात् चांडालाद्युपघातेतुत्यागएव यथाहपराशरः चांडालाद्यैस्तुसंस्पृष्टंधान्यंवस्त्रमथापिवा
प्रक्षालनेनशुद्धेनपरित्यागान्महीमयमिति कारवोरजकश्चैलधावकस्तूपकाराद्यास्तेषांहस्तः सदाशुचिः शुचित्वंतत्साध्येकर्मणिवस्त्रधावना
दौसूतकादिसंभवेपि तथाचस्मृत्यंतरे कारवः शिल्पिनोवैद्यादासीदासास्तथैवच राजानोराजभृत्याश्चसद्यःशौचाः प्रकीर्तिताइति पण्यं
पणार्हंविक्रेयंयवव्रीह्यादि अनेककेतृजनकरपरिघट्टितमप्रयत्नेनभवति सूतकादिनिमित्तेनचवणिजां भिक्षाणांसमूहोभैक्ष्यंतद्ब्रह्म
चर्यादिगतंअनाचांतस्त्रीप्रदानादिनाःशुचिरथादिक्रमणादिनापिनदुष्यतिनथायोषिन्मुखंसंभोगकालेशुचिस्निग्धश्चरतिसंसर्गइतिस्मरणात्१८६

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींभूशुद्धिमाह मार्जन्यायांसुतृणादीनांप्रोत्सारणंमार्जनंदाहस्तृणकाष्ठाद्यैः कालोयावताकालेनलेपादिक्षयोभवतितावान् गोक्रमणंगवां पादपरिघट्टनं सेकः क्षीरगोमूत्रगोमयवारिभिः प्रवर्षणंवा उल्लेखनंतक्षणंखननंवा लेपोगोमयादिभिः एतैः समस्तैर्व्यस्तैर्वामार्जनादिभिरमेध्यादुष्टामलिनाचभूमिः शुद्ध्यति तथाचदेवलः यत्रप्रसूयतेनारीम्रियतेदह्यतेपिवा चांडालाध्युषितंयत्रयत्रविष्ठादिसंगतिः एवंकश्मलभूयिष्ठाभूरमेध्याप्रकीर्तिता श्वशूकररवरोष्ट्रादिसंस्पृष्टादुष्टांत्रजेत् अंगारतुषकेशास्थिभस्माद्यैर्मलिनाभवेदिति अमेध्यादुष्टामलिनेतिशोध्यभूमेस्त्रैविध्यमभिधायशुद्धिविभागंदर्शयति पंचधावाचतुर्धावाभूरमेध्यापिशुध्यति दुष्टान्वितात्रिधाद्वेधाशुध्यतेमलिनैकधे-

भूशुद्धिर्मार्जनाद्दाहात्कालाद्गोक्रमणात्तथा सेकादुल्लेखनाल्लेपाद्गृहंमार्जनलेपनात् १८७

ति यत्रमनुष्यादह्यतेयत्रचांडालैरध्युषितंतयोः पंचभिः दहनकालगोक्रमणसेकोल्लेखनैः शुद्धिः यत्रमनुष्याजायंतेयत्रचम्रियंतेयत्रचोह्यंतेविष्ठादिसंगतिः तासांदाहवर्जितैस्तैरेवचतुर्भिः श्वसूकररवरैश्चिरकालमध्युषितायाः गोक्रमणसेकोल्लेखनैस्त्रिभिः उष्ट्रग्रामकुक्कुटादिभिश्चिरकालमधिवासितायाः सेकोल्लेखनाभ्यांशुद्धिः अंगारतुषादिभिश्चिरकालमधिवासितायाउल्लेखनेनशुद्धिः मार्जनानुलेपनेतुसर्वत्रसमुच्चीयेते एवंगृहंमार्जनलेपनाभ्याशुद्ध्यति गृहस्यपृथगुपादानंमार्जनलेपयोः प्रतिदिवसंप्राप्त्यर्थं १८७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

गोघ्रातेगोविश्वासोपहतेन्नेअदनीयमात्रे तथाकेशमक्षिकाकीदूषिते केशग्रहणंलोमादिप्राप्त्यर्थं कीटाःपिपीलिकादयः उदकंभस्ममृद्भाय-
थासंभवंप्रक्षेतव्यंशुध्यर्थं यत्तुगौतमेनोक्तं नित्यमभोज्यंकेशकीटावपन्नमिति तत्केशकीटादिभिः सहयत्पक्वंतद्विषयम् १८८ त्रपुप्रभृतीनि
प्रसिद्धानितेषांक्षारोदकेनाम्लोदकेनवारिणाचोपघातापेक्षयासमस्तैर्व्यस्तैर्वाशुद्धिः कार्या कांस्यलोहानांभस्मोदकेन ताम्रग्रहणाद्रीतिकावृत्त-
लोहयोर्ग्रहणं एकयोनित्वात् एतच्चताम्रादीनामम्लोदकादिभिः शुद्ध्यभिधानंनियमार्थं मलसंयोगजंतज्जयस्यायेनोपहन्यते तस्यतच्छो
धनप्रोक्तंसामान्यंद्रव्यशुद्धिरूक्तादित्यविशेषेणस्मरणात् अतोनताम्रादेरुच्छिष्टोदकादिलेपस्यान्येनापगमसंभवेनियमेनाम्लोदकादिनाशु-

गोघ्रातेन्नेतथाकेशमक्षिकाकीदूषिते सलिलंभस्ममृद्भिःप्रक्षेतव्यंविशुद्धये १८८
त्रपुसीसकताम्राणाक्षाराम्लोदकवारिभिः भस्माद्भिःकांस्यलोहानांशुद्धिःप्लावोद्रवस्यतु १८९

द्धिःकार्या अतएवमनुनासामान्येनोक्तं ताम्रायःकांस्यरैत्यानांत्रपुणःसीसकस्यच शौचंयथार्हंकर्तव्यंक्षाराम्लोदकवारिभिरिति यत्तुभ
स्मनाशुध्यतेकांस्यंताम्रमम्लेनशुध्यतीति तत्ताम्रादेः शौचस्यपरांकाष्ठांप्रतिपादयितुं नान्यस्यनिषेधाय यदातूपघातातिशयस्तदाम्लोद
कादीनामावृत्तिः गवाघ्रातानिकांस्यानिशूद्रोच्छिष्टानियानिच शुद्ध्यंतिदशभिःक्षारैःश्चकाकोपहतानिचेतिस्मरणात् शुद्धिःप्लावोद्रव
स्यत्विति द्रवस्यद्रवद्रव्यस्यघृतादेःप्रस्थप्रमाणाधिकस्यश्चकाकाद्युपहतस्यअमेध्यसंस्पृष्टस्यच प्लावःप्लावनंसमानजातीयेनद्रवद्रव्येण

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भांडस्यातिपूरणंयावन्निःसरणं शुद्धिरित्यनुवर्तते ततोल्पस्यत्यागः बह्वल्पत्वंचदेशाद्यपेक्षयाकालाद्यपेक्षयावेदितव्यं यथाहबोधायनः देशंकालंतथात्मानंद्रव्यंद्रव्यप्रयोजनं उपपत्तिमवस्थांचज्ञात्वाशौचंप्रकल्पयेदिति कीटाद्युपहतस्यतूत्सवनं यथाहमनुः द्रवाणांचैवसर्वेषां शुद्धिरुत्पवनस्मृतमिति उत्पवनंचात्रवस्त्रांतरितेपात्रेप्रक्षेपः अन्यथाकीटाद्युपगमस्यासंभवात् शूद्रभांडस्थितस्यमधूदकादेः पात्रांतरनयनाच्छुद्धिः मधूदकेपयस्तद्धिकाराश्चपात्रात्पात्रांतरानयनेशुद्ध्याइतिबोधायनस्मरणात् मधुघृतादेर्वर्णापसदहस्तात्प्राप्तस्यपात्रांतरानयनंपुनःपचनंचकार्यं यथाहशंखः अभ्यवहार्याणांघृतेनाभिघारितानांपुनःपचनं एवंस्नेहानांस्नेहवद्रसानामिति १८९ एवंसौवर्णराज

अमेध्याक्तस्यमृत्तोयैः शुद्धिर्गंधादिकर्षणात् वाक्शस्त्रंबुनिर्णिक्तमज्ञातंचसदाशुचि १९०

तादीनांएतत्प्रकरणप्रतिपादितानांसर्वेषामुच्छिष्टस्नेहाद्युपघातेशुद्धिमुत्क्रेदानींतेषामेवामेध्योपहतानांशुद्धिमाह अमेध्याः शरीरजामलावसाशुक्रादयः वसाशुक्रमसृङ्मज्जामूत्रविट्कर्णविड्नखाः श्लेष्माश्रुदूषिकास्वेदोद्वादशैतेनृणांमलाः तथामानुष्यास्थिशवंविष्टारेतोमूत्रार्त्तवंवसा स्वेदोश्रुदूषिकाश्लेष्ममद्यंचामेध्यमुच्यतेइति मनुदेवलादिभिः प्रतिपादिताः तैर्वसादिभिरक्तलिप्तं अमेध्याक्तं तस्यमृदातोयेनशुद्धिः कर्त्तव्या गंधापकर्षणेन आदिग्रहणाल्लेपस्यापिग्रहणं यथाहगौतमः लेपगंधापकर्षणैः शौचममेध्यलिप्तस्येति सर्वशुद्धिषुचप्रथममृत्तोयैरेवलेपगंधापकर्षणंकार्यं अशक्तावन्येन तदद्भिः पूर्वंमृदाचेतिगौतमस्मरणात् वसादिग्रहणंचसर्वेषाममेध्यत्वंप्रतिपादयितुं नसमानोपघाताय

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मद्यैर्मूत्रपुरीषैश्च श्लेष्मपूयाश्रुशोणितैः संस्पृष्टं नैव शुध्येत पुनः पाकेन मृन्मयमित्युपघाते विशेषाभिधानात् अमेध्यत्वं चैवमेषां देहाच्चैवम
लाश्च्युता इति वचनाद्देहच्युतानामेव न स्वस्थानावस्थितानां पुरुषस्य नाभेरूर्ध्वं करव्यतिरिक्तांगानां मन्यामेध्यस्पर्शे स्नानं यथाह देवलः
मानुषास्थिवसाविष्ठामार्त्तवं मूत्ररेतसी मज्जानं शोणितं स्पृष्ट्वा परस्य स्नानमाचरेदिति तान्येव खानि संस्पृश्य प्रक्षाल्याचम्य शुद्ध्यतीति तथा
ऊर्ध्वं नाभेः करौ मुक्त्वा यदंगमुपहन्यते तत्र स्नानमधस्तात्तु प्रक्षाल्याचम्य शुध्यतीति कृतेपि यथोक्तशौचे मनसोपरितोषाद्यत्र शुद्धिसंदेहो भवति
तद्वाक्शस्तं शुचि शुद्धमेतदस्त्विति ब्राह्मणवचनेन शुद्धं भवतीत्यर्थः अंबुनिर्णिक्तं यत्र प्रतिपादिता शुद्धिर्नास्ति तस्य प्रक्षालनेन शुद्धिः प्रक्षालनास

शुचिगोतृप्तिकृत्तोयं प्रकृतिस्थं महीगतम् तथा मांसं श्वचांडालक्रव्यादादिनिपातितम् १९१

हस्य प्रोक्षणेन अज्ञातं च सदा यत्काकाद्युपहतमुपयुक्तं न कदाचिदपि ज्ञायते तच्छुचि तदुपयोगाददृष्टदोषो नास्तीत्यर्थः ननु तद्विरुध्यते संवत्सरस्यैकमपि चरे
त्कृच्छ्रं द्विजोत्तमः अज्ञातभुक्तशुद्ध्यर्थं ज्ञातस्य तु विशेषत इत्यदृष्टदोषेपि प्रायश्चित्तप्रतिपादनात् नैतत्प्रायश्चित्तस्य जग्धिविषयत्वात् दोषाभावस्य चान्योपयोग
विषयत्वात् १९० महीगतभूमिस्थमुदकं एकगवीतृप्तिजननसमर्थं चांडालादिभिरस्पृष्टं प्रकृतिस्थं रूपरसगंधस्पर्शांतरमनापन्नं शुचि आचमनादि-
योग्यं भवति महीगतमित्यशुद्धभूगतस्याशुचित्वनिषेधार्थं नत्वांतरिक्षोदकस्य शुद्धत्वव्यावृत्त्यर्थं नाप्युद्धृतस्य उद्धृताश्चापि शुध्यंति शुद्धैः पा
त्रैः समुद्धृताः एकरात्रोषिता आपस्त्याज्याः शुद्धा अपि स्वयमिति देवलवचनात् तथा चांडालादिकृते तडागादौ न दोषः अंत्यैरपि कृते कूपे सेतौ

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वाप्यादिकेतथा तत्रस्नात्वाचपीत्वाचप्रायश्चित्तंनविद्यतेइतिशातातपस्मरणात् तथामांसंश्वचांडालकव्याद्वादिभिर्निपातितंशुचि आदि
ग्रहणात्पुल्कसादेरपिग्रहणं निपातितमितिग्रहणंभक्षितस्यनिराकरणार्थं १९१ रश्मयः सूर्यादेः प्रकाशकद्रव्यस्य अग्निः प्रसिद्धः रजः
अजादिसंबंधव्यतिरेकेण तत्रश्वकाकोष्ट्रखरोलूकसूकरग्राम्यपक्षिणां अजाविरेणुसंस्पर्शादायुर्लक्ष्मीश्चहीयतेइतिदोषश्रवणात् संमा
र्जनादिकार्ये छायावृक्षादेः गोः अश्वः वसुधाभूमिः अनिलोवायुः विप्रुषोवश्यायबिंदवः मुखवज्जानावक्ष्यमाणत्वात् मक्षिकाश्च एतेचांडा-

रश्मिरग्नीरजश्छायागोरश्वोवसुधानिलः विप्रुषोमक्षिकास्पर्शेवत्सःप्रस्रवनेशुचिः १९२
अजाश्वयोर्मुखंमेध्यंनगोर्ननरजामलाः पथानश्चविशुध्यंतिसोमसूर्यांशुमारुतैः १९३

लादिस्पृष्टाअपिस्पर्शेशुचयः वत्सः प्रस्रवने ऊधोगतदुग्धापकर्षणेशुचिः वत्सग्रहणंबालस्योपलक्षणार्थं बालैरनुपरिक्रांतंस्त्रीभिराचरितं
चयत् अविज्ञातंचयत्किंचिन्नित्यंमेध्यमितिस्थितिरितिवचनात् १९२ अजाश्वयोर्मुखंमेध्यंनगोः ननरजामलाः नरशब्दोलक्षणयादेहम
भिधत्ते तज्जामलावसादयोनमेध्याभवंति पंथानोमार्गाश्चांडालादिभिः स्पृष्टाअपिरात्रौसोमांशुभिर्मारुतेनचशुध्यंति दिवासूर्यांशुभिर्मारुतेनच

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

मुखेजाता मुखजाः श्लेष्मविप्रुषोमेध्यानोच्छिष्टंकुर्वंति अनिपातिताश्चेदंगे नमुखेविप्रुषउच्छिष्टंकुर्वंतिनचेदंगेनिपतंतीतिगौतमवचनात् तथा येआचमनतोयबिंदवः पादौस्पृशंतितेमेध्याः श्मश्रुचास्यगतंमुखप्रविष्टउच्छिष्टंनकरोति दंतसक्तंचान्नादिकंस्वयमेवच्युतंत्यक्ताशुचिर्भवति अच्युतंदंतसमं तथाचगौतमः दंतश्लिष्टंतुदंतवदन्यत्रजिह्वाभिमर्शनात्पाक्च्युतेरित्येके च्युतेष्वास्रावबहिर्यान्निगिरन्नेवत च्छुचिरिति निगिरणंपुनरनेनयाज्ञवल्क्योक्तेनत्यागेनविकल्प्यते निगिरन्नेवेत्येवकारः चर्वणेत्वाचमेन्नित्यंभुक्त्वातांबूलचर्वणं ओष्ठौ विलोमकौस्पृष्ट्वावासोविपरिधायचेतिविष्णूक्ताचमननिषेधार्थः तांबूलग्रहणंफलाद्युपलक्षणार्थं यथाहशातातपः तांबूलेचफलेचै

मुखजाविप्रुषोमेध्यास्तथाचमनबिंदवः श्मश्रुचास्यगतंदंतसक्तंततः शुचिः १९४ स्नात्वापी
त्वाक्षुत्वासुप्तेभुक्तारथ्योपसर्पणे आचांतःपुनराचामेद्वासोविपरिधायच १९५

वभुक्तेस्नेहावशिष्टके दंतलग्न
स्यसंस्पर्शेनोच्छिष्टोभवतिद्विजइति १९४ स्नानपानक्षुतस्वप्नभोजनरथ्योपसर्पणवासोविपरिधानेषुकृतेष्वाचांतः पुनराचामेत्द्वि राचमेदित्यर्थः चकारादुदनाध्ययनारंभाल्पानृतोक्त्यादिषु तथाचवसिष्ठः सुत्वाभुक्त्वाक्षुत्वास्नात्वापीत्वारुदित्वाचाचांतः पुनराचा मेदिति मनुरपि सुत्वाक्षुत्वाचभुक्त्वाचष्ठीवित्वोत्कानृतंवचः पीत्वापोध्येष्यमाणस्यआचामेत्प्रयतोपिसन्निति भोजनेत्वाद्यावपिद्विराच मनं भोक्ष्यमाणस्तुप्रयतोपिद्विराचामेदित्यापस्तंबस्मरणात् स्नानपानयोरादौसकृत् अध्ययनेत्वारंभेद्विःशेषेष्वंतेएवयथोक्तंद्विराचम नं १९५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रथ्यामार्गमात्रं कर्दमः पंकः तोयमुदकं रथ्यास्थितानि कर्दमतोयानि अंत्यैश्चांडालादिभिः श्वभिर्वायसैश्च स्पृष्टानि मारुतेनैव शुध्यंति शुद्धिमुपयांति बहुवचनं तद्धृतगोमयशर्करादिप्रास्त्यर्थं पक्वेष्टकादिभिश्चितानि धवलगृहादीनि चांडालादिस्पृष्टानि मारुतेनैव शुध्यंति एतच्च प्रोक्षणसंहतानामित्युक्तप्रोक्षणनिषेधार्थं तृणकाष्ठपर्णादिमयानां तु प्रोक्षणमेवेति इति द्रव्यशुद्धिप्रकरण १९६ इदानीं दानधर्मप्रतिपादयिष्यन्तदंगभूतपात्रप्रतिपादनार्थं तत्प्रशंसामाह ब्रह्मा हिरण्यगर्भः कल्पादौ तपस्तप्त्वा ध्यानं कृत्वा कान्मुख्यान् सृजामीति पूर्वं ब्राह्मणान् सृ

रथ्याकर्दमतोयानि स्पृष्टान्यंत्यश्ववायसैः मारुतेनैव शुद्ध्यंति पक्वेष्टकचितानि च १९६ तपस्तप्त्वा
सृजद्ब्रह्मा ब्राह्मणान्वेदगुप्तये तृप्त्यर्थं पितृदेवानां धर्मसंरक्षणाय च १९७ सर्वस्यप्रभवो विप्राः
श्रुताध्ययनशीलिनः तेभ्यः क्रियापराः श्रेष्ठास्तेभ्योप्यध्यात्मवित्तमाः १९८

ष्टवान् किमर्थं वेदगुप्तये वेदरक्षणार्थं पितॄणां देवतानां च तृप्त्यर्थं अनुष्ठानोपदेशद्वारेण धर्मरक्षणार्थं च अतस्तेभ्योदत्तमक्षय्यफलं भवतीत्यभिप्रायः १९७ सर्वस्य क्षत्रियादेर्विप्राः प्रभवः श्रेष्ठा जात्या कर्मणा च ब्राह्मणेष्वपि श्रुताध्ययनशालिनः श्रुताध्ययनसंपन्नाउत्कृष्टाः तेभ्योपि क्रियापराः विहितानुष्ठानशीलाः तेभ्योप्यध्यात्मवित्तमाः वक्ष्यमाणमार्गेण शमदमादियोगेनात्मतत्त्वज्ञाननिरताः श्रेष्ठाइत्यनुषज्जते १९८ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवं जातिविद्यानुष्ठानतपसां प्रशंसासु रत्नेनैकैकयोगेन पात्रतामभिधाय धुनानेषां समुच्चये संपूर्णपात्रतामाह केवलयाविद्यया श्रुताध्ययनसंपत्यानेव संपूर्णपात्रत्वं नापि केवलेन तपसा शमदमादिना अपिशब्दात्केवलानुष्ठानेन केवलजात्या वा नैव संपूर्णपात्रता कथं तर्हि यत्र पुरुषे इत्तमनुष्ठानं इमे चोभे विद्यातपसी स्तः चशब्दाद्ब्राह्मणजातिश्च तदेवमन्वादिभिः संपूर्णपात्रं प्रकीर्तितं हि यस्मादतः परमुत्कृष्टं पात्रं नास्ति अत्र जातिविद्यानुष्ठानतपः समुच्चयानामुत्तरोत्तरप्राशस्त्येन फलतारतम्यं द्रष्टव्यं १९९ पूर्वोक्तेषु पात्रेषु गवादिकर्मचितं शास्त्रोक्तोदकदानादी-

नविद्यया केवलया तपसा वापि पात्रता यत्रैतत्त्रयमिमे चोभे तद्धि पात्रं प्रकीर्तितम् १९९
गोभूतिलहिरण्यादि पात्रेदातव्यमर्चितम् नापात्रेविदुषाकिंचिदात्मनः श्रेयइच्छता २००

तिकर्तव्यतासहितं देयं अपात्रेक्षत्रियादौ ब्राह्मणेचपतितादौ विदुषापात्रविशेषेण फलविशेषं जानता श्रेयः संपूर्णमिच्छता किंचिदल्पमपि न दातव्यं श्रेयोग्रहणाद पात्रदानेपि किमपि तामसं फलमस्तीति सूचितं यथाह कृष्णद्वैपायनः अदेशकालेयद्दानमपात्रेभ्यश्च दीयते असत्कृतमवज्ञातं तत्तामसमुदाहृतमिति अपात्रेनदातव्यमिति यदनाविशिष्टदेशकालद्रव्यसन्निधौ पात्रस्यासंनिधानेद्रव्यस्यवा तदुद्देशेनत्यागं तस्मै प्रतिश्रवणंवा कृत्वासमर्पयेत् नापात्रेदातव्यमितिसूचितम् तथाप्रतिश्रुतमपिपश्चात्पातकादिसंयोगज्ञानेनदेयं प्रतिश्रुत्याप्यधर्मसंयुक्तायनदद्यादितिनिषेधात् २००

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपात्रेदातुर्निषेधमुत्काप्रतिग्रहीतारंप्रत्याह विद्यातपोभ्यांहीनेनप्रतिग्रहः सुवर्णादिर्नग्राह्यः यस्माद्विद्यादिहीनः प्रतिगृह्णन्दातारमात्मानंचाधोनरकंनयतिप्रापयतीति २०१ गवादिपात्रेदातव्यमित्युक्तंतत्रविशेषविशेषमाह प्रतिदेवसंशक्त्यनुसारेणयथोक्तविधिनापात्रेगवादिकंस्वकुटुंबाविरोधेनदातव्यं निमित्तेषुचंद्रोपरागादिषुविशेषतोधिकंयत्नेनदातव्यं याचितेनापिश्रद्धापूतंअनसूयापवित्रीकृतंशक्त्यादातव्यं याचितेनापिदातव्यमितिवदतायथोक्तपात्रंस्वयमेवगत्वाआहूयवायद्दानंतन्महाफलमुक्तं तथाचस्मरणं गत्वायद्दीयतेदानंतदनंत-

विद्यातपोभ्यांहीनेननतुग्राह्यःप्रतिग्रहः गृण्हन्प्रदातारमधोनयत्यात्मानमेवच्च २०१ दातव्यंप्रत्यहंपात्रे
निमित्तेतुविशेषतः याचितेनापिदातव्यंश्रद्धापूतंतुशक्तितः २०२ हैमश्रृंगीरखुरैरौप्यैः सुशीलावस्त्रसंयुता
सकांस्यपात्रादातव्याक्षीरिणीगौः सदक्षिणा २०३ दातास्याःस्वर्गमाप्नोतिवत्सरान्रोमसंमितान् कपि
लाचेत्तारयतिभूयश्चासप्तमंकुलम् २०४

फलंस्मृतम् सहस्रगुणमाह्ययाचितेतुतदर्धकमिति २०२ गवादिकंदेयमित्युक्तं तत्रगोदानेविशेषमाह हेममयेशृंगेयस्याःसाहेमशृंगी शफैः रौप्यैः राजतैःखुरैः संयुता वस्त्रेणचसंयुताकांस्यपात्रसहिता बहुक्षीरागौर्यथाशक्तिदक्षिणासहितादातव्या २०३ गोदानफलमाह अस्याः गोः रोमसंमितान् रोमसंख्याकान्वत्सरान्स्वर्गमाप्नोतिदाता सायदिकपिलातदानकेवलदातारंतारयति किंतुकुलमपि आसप्तमंसप्तममभिव्याप्यपित्रादीन्षट् आत्मानंचसप्तमं अप्यर्थेभूयःशब्दः २०४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सवत्सारोमतुल्यानियत्सेनसहवर्ततइतिसवत्सातस्यारोमतुल्यानि वत्सस्यगोश्चयावंतिरोमाणितावत्संख्याकानियुगानिकृतत्रेतादीनिउ
भयतोमुखींददत्स्वर्गमाप्नोति अनुभवतिपूर्वेणविधिनाचेत् २०५ कापुनरुभयतोमुखीकथंतावद्दानंमहाफलमित्यतआह गर्भान्निर्ग
च्छतोवत्सस्यद्वौपादौमुखंचयावत्कालंयोन्यादृश्यतेतावत्कालंउभयतोमुखमस्याअस्तीत्युभयतोमुखी यावत्कालंगर्भंनमुंचतिताव
त्सागोः पृथिवीसमाज्ञेया अतःफलातिशयोयुक्तः २०६ यथाकथंचिद्धेमशृंगाद्यसंभवेपियथासंभवंपूर्वोक्तेनविधिनाधेनुदोग्ध्रीं अ

सवत्सारोमतुल्यानियुगान्युभयतोमुखीं दातास्याःस्वर्गमाप्नोतिपूर्वेणविधिनाददत् २०५ यावद्वत्सस्यपादौ
द्वौमुखयोन्याचदृश्यते तावद्द्वोःपृथिवीज्ञेयायावद्गर्भंनमुंचति २०६ यथाकथंचिद्धत्वागांधेनुंवाधेनुमेववा
अरोगामपरिक्लिष्टादातास्वर्गमहीयते २०७ श्रांतसंवाहनरोगिपरिचर्यासुरार्चनम् पादशौचद्विजोच्छिष्टमा
जनंगोप्रदानवत् २०८

अधेनुंवाअवध्यांअरोगांरोगरहितांअपरिक्लिष्टांअत्यंतादुर्बलांगांदत्वादातास्वर्गेमहीयतेपूज्यते
२०७ गोदानसमान्याह श्रांतस्यासनशयनादिदानेनश्रमापनयनंश्रांतसंवाहनम् रोगिणांपरिचर्यायथाशक्त्यौषधादिदानेन सुरा
र्चनंहरिहरहिरण्यगर्भादीनांगंधमाल्यादिभिराराधनं पादशौचंद्विजानांसमानानामधिकानांच तेषामेवोच्छिष्टस्यसंमार्जनम् एता
न्यनंतरोक्तेनगोदानेनसमानि २०८ भूःफलप्रदा दीपदेवायतनादिषु प्रतिश्रयः प्रवासिनामाश्रयः निवेशनार्थंगार्हस्थ्यार्थंयत्कन्यादी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यतेतन्नैवेशिकम् स्वर्णंसुवर्णं धुर्योभारसहोबलीवर्दः शेषंप्रसिद्धं एतान्भूदीपादीन्दत्वास्वर्गलोकेपूज्यते स्वर्गफलंचभूमिदानादीनांन-
फलांतरव्युदासार्थं यत्किंचित्कुरुतेपापंज्ञानतोज्ञानतोपिवा अपिगोचर्ममात्रेणभूमिदानेनशुध्यति तथा वारिदस्तृप्तिमाप्नोतिसुखमक्षय्य
मन्नदः तिलदश्चप्रजामिष्टांदीपदश्चक्षुरुत्तमं वासोदश्चंद्रसालोक्यमश्विसालोक्यमश्वदइत्यादिफलांतरश्रवणात् गोचर्मलक्षणंचबृहस्पति
नादर्शितं सप्तहस्तेनदंडेनत्रिंशद्दंडंनिवर्तनम् दशतान्येवगोचर्मदत्वास्वर्गेमहीयते २०९ गृहंप्रसिद्धं धान्यानिचशालिगोधूमादीनि अभ
यंभीतत्राणं उपानहौछत्रं माल्यंमल्लिकादेः अनुलेपनंकुंकुमचंदनादि यानंरथादि वृक्षमुपजीव्यमाम्रादिकं प्रियंयद्यस्यप्रियंधर्मादिकं श

भूदीपांश्चान्नवस्त्रांभस्तिलसर्पिःप्रतिश्रयान् नैवेशिकंस्वर्णधुर्यंदत्वास्वर्गेमहीयते २०९ गृहधान्याभयो
पानच्छत्रमाल्यानुलेपनम् यानंवृक्षंप्रियंशय्यांदत्वात्यंतंसुखीभवेत् २१०

य्यांचदत्वात्यंतंअतिशयेनसुखीभवति नच
हिरण्यादिवद्धस्तेदातुमशक्यत्वाद्धर्मादीनामसंभवः भूमिदानादावपिसमानत्वात् स्मृत्यंतरेपिधर्मदानश्रवणात् देवतानांगुरूणांचमाता
पित्रोस्तथैवच पुण्यंदेयंप्रयत्नेननापुण्यंचोदितंक्वचित् अपुण्यदानेतदेववर्धते प्रतिग्रहीतुरपिलोभादिनाप्रवृत्तस्य यःपापमबलंज्ञात्वाप्रति
गृण्हातिदुर्मतिः गर्हिताचरणात्तस्यपापंतावत्समाश्रयेत् समंद्विगुणसाहस्रमानंत्यंचप्रदातृष्वितिस्मरणात् इहचसर्वत्रदेशकालपात्रविशेषाद्दे
यविशेषाद्दातृविशेषाद्दानेफलंमयाप्रोक्तंहिंसायांतद्वदेवहीतिप्रतिगृहीतृवृत्तिविशेषाच्चदातृप्रतिग्रहीत्रोः फलतारतम्यंद्रष्टव्यं २१०

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्मात्सर्वधर्ममयंब्रह्मअवबोधकत्वेनतस्मात्तद्दानंसर्वदानेभ्योऽधिकं अतस्तद्ददध्यापनादिद्वारेणब्रह्मलोकमवाप्नोति अविच्युतंच्यु-
त्यर्थानभवति आभूतसंप्लवंब्रह्मलोकेवतिष्ठतेइत्यर्थः अत्रचब्रह्मदानेपरस्वत्वापादनमात्रंदानस्वत्वनिवृत्तेः कर्तुमशक्यत्वात् २११ दा
नात्फलमुक्त्वेदानींदानव्यतिरेकेणापिदानफलावाप्तिहेतुमाह यःपात्रभूतोपिप्राप्तंप्रतिग्रहं सुवर्णादिकंनादत्तेनस्वीकरोति असौयद्यप्राप्त-
नोपादत्तेतन्नदानशीलानांयेलोकाः तान्समग्रानाप्नोति २१२ इदानींसर्वप्रतिग्रहनिवृत्तिप्रसंगेऽपवादमाह धानाःफलंयवाः क्षितिर्भूमि

सर्वधर्ममयंब्रह्मप्रदानेभ्योधिकंयतः तद्ददत्समवाप्नोतिब्रह्मलोकमविच्युतम् २११ प्रतिग्रहसमर्थो
पिनादत्तेयःप्रतिग्रहम् येलोकादानशीलानांसतानाप्नोतिपुष्कलान् २१२ कुशाःशाकंपयोमत्स्यागंधाः
पुष्पंदधिक्षितिः मांसंशय्यासनंधानाः प्रत्याख्येयंनवारिच २१३ अयाचितात्तंतंग्राह्यमपिदुष्कृतकर्मणः
अन्यत्रकुलदाषंढपतितेभ्यस्तथाद्विषः २१४

का शेषंप्रश्निदं एतत्कुशादिकंस्वयमुपानीतंनप्रत्याख्येयं चकाराद्गृहादि
शय्यांगृहान्कुशानांधानापः पुष्पंमणीन्दधि मत्स्यान्धानाःमयोमांसंशाकंचैवननिर्णुदेत् तथागंधोदकंमूलफलमन्नमभ्युद्यतंचयत् सर्वतः
प्रतिगृह्णीयान्मध्याज्याभयदक्षिणामितिमनुस्मरणात् २१३ किमितिनप्रत्याख्येयमित्याह यद्यस्मादयाचितमेतत्कुशाद्यात्तंदुष्कृतकारिणोपि
संबंधिग्राह्यं किमुतयथोक्तकारिणः तस्मान्नप्रत्याख्येयं अन्यत्रकुलदाषंढपतितेभ्यः शत्रोश्चकुलमदंतीतिकुलदाः स्वैरिण्यादिकाः षंढस्तृतीयाप्रकृतिः
२१४

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

प्रतिग्रहनिवृत्तेरपवादांतरमाह देवतातिथ्यर्चनादेरावश्यकत्वात्तदर्थमन्नात्मकारणात् पतितादन्यतंकुत्सितवर्जंसर्वतः प्रतिगृह्णीयात् गुरवोमातापित्रादयः भृत्याभरणीयाः भार्यापुत्रादयः इतिदानधर्मप्रकरणं २१५ इदानींश्राद्धप्रकरणमारभ्यते श्राद्धंनामादनीयस्य-तत्स्थानीयस्यवाद्रव्यस्यप्रेतोद्देशेनश्रद्धयात्यागः तच्चद्विविधं पार्वणमेकोद्दिष्टमिति तत्रत्रिपुरुषोद्देशेनयत्क्रियतेतत्पार्वणं एकपुरुषोद्देशे नक्रियमाणमेकोद्दिष्टं पुनश्चत्रिविधं नित्यंनैमित्तिकंकाम्यंचेति तत्रनित्यंनियतनिमित्तोपाधौचोदितमहरहरमावास्याष्टकादिषु अनिय तनियतोपाधौचोदितंनैमित्तिकं यथापुत्रजन्मादिषु फलकामनोपाधौविहितंकाम्यं यथास्वर्गादिकामनायांकृत्तिकादिनक्षत्रेषु पुनश्चपं

देवातिथ्यर्चनकृतेगुरुभृत्यार्थमेवच सर्वतः प्रतिगृण्हीयाद्भात्मभृत्यर्थमेवच २१५ अमावास्याष्ट
काद्वृद्धिःकृष्णपक्षोयनद्वयम् द्रव्यब्राह्मणसंपत्तिर्विषुवत्सूर्यसंक्रमः २१६

चविधं अहरहः श्राद्धंपार्वणं वृद्धिश्रा द्धमेकोद्दिष्टंसपिंडीकरणंचेति तत्राहरहःश्राद्धं अन्नंपितृमनुष्येभ्यइत्यादिनोक्तं तथाचमनुः दद्याद्दहरहः श्राद्धमन्नाद्येनोदकेनवा पयोमू लफलैर्वापितृभ्यःप्रीतिमक्षयामीति अधुनापार्वणंवृद्धिश्राद्धंचदर्शयिष्यंस्तयोःकालानाह यत्रदिनेचंद्रमानदृश्यतेसाअमावास्या तस्यामह र्द्वयव्यापिन्यामपराह्णव्यापिनीग्राह्या अपराण्हःपितृणामितिवचनात् अपराण्हश्चपंचधाविभक्तेदिनेचतुर्थोभागस्त्रिमुहूर्तः अष्टकाश्चत स्रः हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीषष्टकाइत्याश्वलायनोक्ताः वृद्धिःपुत्रजन्मादि कृष्णपक्षोपरपक्षः अयनद्वयंदक्षिणोत्तरसं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्तकं द्रव्यंकृष्णसारमांसादिकं ब्राह्मणसंपत्तिर्वक्ष्यमाणा विषुवद्दयंमेषतुलयोः सूर्यगमनं सूर्यसंक्रमः आदित्यस्यराशेः राश्यंतरगमनं अयनविषुवतोः संक्रांतित्वेसिद्धेपिपृथगुपादानं फलातिशयप्रतिपादनार्थं व्यतीपातोयोगविशेषः गजच्छायायदेंदुः पितृदैवत्येहंसश्चैव करेस्थितः याम्यानिधिर्भवेत्साहिगजच्छायाप्रकीर्तितेतिपरिभाषिता हस्तिछायेतिकेचित् सेहनगृह्यते कालप्रक्रमात् ग्रहणंसोमसूर्ययो रुपरागः यदाचकर्तुः श्राद्धंप्रतिरुचिर्भवतितदापि चशब्दाद्युगादिप्रभृतयः एतेश्राद्धकालाः यद्यपिचंद्रसूर्यग्रहेनाद्यादितिग्रहणेभो जननिषेधस्तथापिभोक्तुर्दोषोदातुरभ्युदयः २१६ २१७ अहरहः श्राद्धव्यतिरिक्तवक्ष्यमाणचतुर्विधश्राद्धेषु ब्राह्मणसंपत्तिमाह

व्यतीपातोगजच्छायाग्रहणंचंद्रसूर्ययोः श्राद्धं प्रतिरुचिश्चैवश्राद्धकालाः प्रकीर्तिताः २१७
अग्र्याः सर्वेषुवेदेषुश्रोत्रियोब्रह्मविद्युवा वेदार्थविज्ज्येष्ठसामात्रिमधुस्त्रिसुपर्णिकः २१८

सर्वेषुवेदेषुऋग्वेदादिषु अनन्यमनस्कतयाप्यस्खलिताध्ययनक्षमाअग्र्यः श्रोत्रियः श्रुताध्ययनसंपन्नः वक्ष्यमाणंब्रह्मयोवेत्ति असौ ब्रह्मवित् युवामध्यमवयस्कः सर्वस्येदंविशेषणं मंत्रब्राह्मणयोरर्थंवेत्तीतिवेदार्थवित् ज्येष्ठसामेतिसामविशेषस्तदध्ययनांगंव्रतंच-तद्व्रताचरणेनयस्तदधीतेसज्येष्ठसामा त्रिमधुः ऋग्वेदैकदेशस्तद्व्रतंचतद्व्रताचरणेनतदधीतेइतित्रिमधुः त्रिसुपर्णं ऋग्यजुषोरेकदे शस्तद्व्रतंचतद्व्रताचरणेनयस्तदधीतेसत्रिसुपर्णिकः एतेब्राह्मणाः श्राद्धसंपदइतिवक्ष्यमाणक्रियासंबंधः २१८ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्वस्त्रीयोभागिनेयः ऋत्विगुक्तलक्षणः जामातादुहितुर्भर्ता त्रिणाचिकेतं यजुर्वेदैकदेशः तद्व्रतंचतद्व्रताचरणेनयस्मादध्यायी सत्रिणाचिकेतः अन्यत्प्रसिद्धं एतेचपूर्वोक्ताश्रोत्रियाद्यभावेवेदितव्याः एषवैप्रथमःकल्पः प्रदानेहव्यकव्ययोः अनुकल्पस्त्वयंप्रोक्तः सदासद्भिरगर्हितइत्यभिधायमनुनास्वस्त्रीयादीनामभिहितत्वात् २१९ कर्मनिष्ठाविहितानुष्ठानपराः तपोनिष्ठास्तपःशीलाः सभ्यावसथ्योत्रेताग्नयश्चयस्यसंतिसपंचाग्निः पंचाग्निविद्याध्यायीच ब्रह्मचारीउपकुर्वाणकोनैष्ठिकश्च पितृमातृपरास्तत्पूजापराः चकारात्ज्ञाननिष्ठा

स्वस्त्रीयऋत्विग्जामातृयाज्यश्वशुरमातुलाः त्रिणाचिकेतद्वौहित्रशिष्यसंबंधिबांधवाः २१९
कर्मनिष्ठास्तपोनिष्ठाःपंचाग्निब्रह्मचारिणः पितृमातृपराश्चैवब्राह्मणाःश्राद्धसंपदः २२०
रोगीहीनातिरिक्तांगः काणःपौनर्भवस्तथा अवकीर्णीकुंडगोलौकुनखीश्यावदंतकः २२१

दयः ब्राह्मणाःनक्षत्रियादयःश्राद्धसंपदःश्राद्धेष्वक्षय्यफलसंपत्तिहेतवः २२० वर्ज्यानाह रोगोमहारोगोपसृष्टः हीनमतिरिक्तंवांगंयस्यासौहीनातिरिक्तांगः एकेनाक्ष्णायोनपश्यतिसकाणः एतस्मादेवांधबधिरविरूपप्रजननस्वल्पादयश्चमप्रभृतयोनिरस्ताः पुनर्भूरुक्तलक्षणातस्यांजातःपौनर्भवः अवकीर्णीब्रह्मचार्येवस्खलितब्रह्मचर्यः कुंडगोलौपरदारेषुजायेतेद्वौसुतौकुंडगोलकौ पत्यौजीवतिकुंडस्तुमृतेभर्तरिगोलकइत्येवमुक्तलक्षणकौ कुनखीसंकुचितनखः श्यावदंतकः स्वभावात्कृष्णदशनः एतेश्राद्धेनिंदिताइतिवक्ष्यमाणेनसंबंधः २२१

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

वेतनग्रहणेनयोध्यापयतिसभृतकाध्यापकः वेतनदानेनचयोधीतेसोपि क्लीबोनपुंसकः असद्भिःसद्भिर्वादोषैर्यः कन्यांदूषयतिसकन्या
दूषी सतासताब्रह्महत्यादिनाभियुक्तोभिशस्तः मित्रध्रुक्मित्रद्रोही परदोषसंकीर्तनशीलः पिशुनः सोमविक्रयीयज्ञेसोमस्यविक्रेता परिवि
दकःपरिवेत्ता ज्येष्ठेअकृतदारेअकृताग्निपरिग्रहेवायःकनीयान्दारपरिग्रहमग्निपरिग्रहंवाकुर्यात्सपरिवेत्ता ज्येष्ठस्तुपरिविन्नः यथाह
मनुः दाराग्निहोत्रसंयोगंयःकरोत्यग्रजेस्थिते परिवेत्तासविज्ञेयःपरिविन्नस्तुपूर्वजइति एवंदातृयाजकावपि परिविन्नः परिवेत्ता यथाच
परिविद्यते सर्वंतेनरकंयांतिदातृयाजकपंचमाइति २२२ विनाकारणेनमातापितृगुरूत्यजतिसमातापितृगुरुत्यागी एवंभार्यापुत्रत्या

भृतकाध्यापकःक्लीबःकन्यादूष्यभिशस्तकः मित्रध्रुक्पिशुनःसोमविक्रयीपरिविंदकः२२१ मातापितृगुरु
त्यागीकुंडाशीवृषलात्मजः परपूर्वापतिस्तेनः कर्मदुष्टाश्च निंदिताः २२३

ग्यपि वृद्धौचमातापितरौसाध्वींभार्यांसुतः
शिशुः अष्टकार्यशतंकृत्वाभर्तव्यामनुरब्रवीदितिसमाननिर्देशात् कुंडस्यान्नंयोभ्रात्यसोकुंडाशी एवंगोलकस्यापि यस्तयोरन्नमश्नातिस-
कुंडाशीप्रकीर्तितइतिवचनात् वृषलोनिर्धर्मस्तत्सुतोवृषलात्मजः परपूर्वापुनर्भूः तस्याः पतिः अदत्तादायीस्तेनःकर्मदुष्टाः शास्त्रविरुद्धका
रिणः चकारांत्कितवदेवलकप्रभृतयः एतेश्राद्धेनिंदिताः प्रतिषिद्धाः अग्र्याः सर्वेषुवेदेष्वित्यादिना श्राद्धयोग्यब्राह्मणप्रतिपादनेनैवतद्व्यतिरि
क्तानामयोग्यत्वेसिद्धेपिपुनःकेषांचिद्रोग्यादीनांप्रतिषेधवचनंउक्तलक्षणब्राह्मणासंभवेप्रतिषेधरहितानांप्राप्त्यर्थं २२३ ७२

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

एवंश्राद्धकालान् ब्राह्मणांश्चोत्काधुनापार्वणप्रयोगमाह पूर्वोक्तान्ब्राह्मणान् श्राद्धेक्षणः क्रियतामितिपूर्वेद्युर्निमंत्रयेत प्रार्थनयाक्षणमभ्युपगमयेत् अपरेद्युर्वा पूर्वेद्युःपरेद्युर्वाश्राद्धकर्मण्यवस्थिते निमंत्रयेतव्यवरान्सम्यग्विप्रान्यथोदितानितिमनुस्मरणात् आत्मवान्शोकोन्मादादिरहितःसन्दोषवान्नभवति यद्वा आत्मवान्नियतेंद्रियोभवेत् शुचिःप्रयतश्चतैरपिनिमंत्रितैर्ब्राह्मणैर्मनोवाक्कायव्यापारैः संयतैर्नियतैर्भवितव्यं २२४ अपराण्हेतूक्तलक्षणेतान्निमंत्रितान्ब्राह्मणानाहूयस्वागतवचनेनपूजयित्वाकृतपादधावनानांचांतान्कृतेष्वासनेषुपवित्रपाणिः पवित्रपाणीनुपवेशयेत् यद्यपिसामान्येनापराण्हेइत्युक्तथापिकुतपेप्रारभ्यतदादिपंचमुहूर्तेषुपरिसमापनश्रेयस्क

निमंत्रयेतपूर्वेद्युर्ब्राह्मणानात्मवान्शुचिः तैश्चापिसंयतैर्भाव्यंमनोवाक्कायकर्मभिः २२४
अपराण्हेसमभ्यर्च्यस्वागतेनागतास्तुतान् पवित्रपाणिराचांतानासनेषूपवेशयेत् २२५

रं अह्नोमुहूर्ताविख्याता दशपंचचसर्वदा तत्राष्टमोमुहूर्त्तोयः सकालः कुतपःस्मृतः मध्यान्हेसर्वदायस्मान्मंदीभवतिभास्करः तस्मादनंतफलदस्तत्रारभोविशिष्यते ऊर्ध्वंमुहूर्तालुतपाद्यन्मुहूर्तंचतुष्टयं मुहूर्तपंचकंत्येतत्स्वधाभवनमिष्यतेइतिवचनात् तथान्यदपि-श्राद्धोपयोगिकुतपसप्तकमुक्तं मध्यान्हःखड्गपात्रंचतथानेपालकंबलः रौप्यंदर्भास्तिलागावोदौहित्रश्चाष्टमःस्मृतः पापंकुत्सितमित्याहुस्तस्यसंतापकारिणः अष्टावेतेयतस्तस्मात्कुतपाइतिविश्रुताइति २२५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दैवे आभ्युदयिकेश्राद्धे समान् ब्राह्मणान् उपवेशयेत् कथंयथाशक्ति शक्तिमनतिक्रम्य तत्रवैश्वदेवे द्वौद्वौमात्रादीनांनिसृणामेकैकस्याद्वौ-द्वौनिसृणावाद्वौ एवंपित्रादीनामेकैकस्यद्वौद्वौत्रयाणांवाद्वौ एवंमातामहानांच वर्गत्रयेपिवैश्वदेवंतत्रवा पित्र्येपार्वणश्राद्धे अयुग्मान्वि षमानुपवेशयेत् इतिसंबध्यते एतच्चपरिस्तृतेसर्वतःप्रच्छादिते शुचौगोमयादिनोपलिप्तेदक्षिणाप्रवणेदक्षिणतोवननतेदेशेकार्यं २२६ अ युग्मान्पित्र्यइतिपार्वणश्राद्धांगभूतेवैश्वदेवेप्ययुग्मप्रसंगेइदमारभ्यतेद्वौदेवइति दैवे वैश्वदेवेद्वौब्राह्मणौ प्राङ्मुखावुपवेश्यौपित्र्येअयुग्मानि त्यविशेषप्रसंगेविशेषउच्यतेत्रयःपित्र्येइति पित्र्येपित्रादिस्थानेत्रयःउदङ्मुखाउपवेश्याः पक्षांतरमाह एकैकमेववा वैश्वदेवेपित्र्येच एक

युग्मान्दैवेयथाशक्तिपित्र्येयुग्मांस्तथैवच परिस्तृतेशुचौदेशेदक्षिणाप्रवणेतथा २२६
द्वौदैवेप्राक्त्रयःपित्र्येउदगेकैकमेववा मातामहानामप्येवंतत्रवावैश्वदैविक २२७

मेकमुपवेशयेत् संभवतोविकल्पः मातामहानामप्येवंश्राद्धेनिमंत्रणादिद्वौदैवेप्राक्त्रयः पित्र्येउदगेकैकमेववेत्येवमंतंपितृश्राद्धवत्क-र्तव्यम् पितृश्राद्धेमातामहश्राद्धेचवैश्वदैविकंवैश्वदेवंतंत्रेणवाकर्तव्यं तंत्रशब्दःसमुदायवाचकइति यदातुद्वावेवब्राह्मणौलब्धौतदातुवै-श्वदेवेपात्रंप्रकल्प्यउभयत्रैकैकंब्राह्मणंनियुंज्यात् यथाहवसिष्ठः यद्येकंभोजयेच्छ्राद्धेदैवंतत्रकथंभवेत् अन्नंपात्रेसमुद्धृत्यसर्वस्यप्रक्ष तस्यच देवतायतनेकृत्वाततः श्राद्धंप्रवर्तयेत् प्रास्येदन्नंतदग्नौतुदद्याद्वाब्रह्मचारिणइति २२७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तदनंतरं विश्वेदेवार्थं ब्राह्मणहस्तेजलं दत्वाविष्टरार्थंकुशांश्चयुग्मान् द्विगुणितानासनेदक्षिणतोदत्वाविश्वान्देवानावाहयिष्येइतिब्राह्मणान्पृष्ट्वातेरावाहयेत्यनुज्ञातोविश्वेदेवासआगतेत्यनयाऋचाआगच्छंतुमहाभागाइत्यनेनचस्मार्तेनमंत्रेणतानावाहयेत् एतच्चयज्ञोपवीतिनासव्येनचप्रदक्षिणंचकार्यं अपसव्यंततःकृत्वापितॄणामप्रदक्षिणमितिपित्र्येविशेषस्मरणात् २२८ ततोविश्वेदेवार्थंब्राह्मणसमीपेभूमिंप्रदक्षिणेनयवैरन्वास्तीर्यअनंतरंतैजसादिभाजनेसपवित्रकेकुशयुग्मानर्हितेशन्नोदेवीरभिष्टयइत्यनयर्चापःक्षिप्त्वायवोसिधा

पाणिप्रक्षालनंदत्वाविष्टरार्थंकुशानपि आवाहयेदनुज्ञातोविश्वेदेवासइत्यृचा २२८ यवैरन्ववकीर्यांथभाजनेसपवित्रके शन्नोदेव्यापयःक्षिप्त्वायवोसीतियवांस्तथा २२९ यादिव्याइतिमंत्रेणहस्तेष्वर्घ्यंविनिक्षिपेत् दत्वोदकंगंधमाल्यंधूपदानंसदीपकम् २३०

न्यराजोसीत्यादिनामंत्रेणयवान्ततोगंधपुष्पाणिचक्षिप्त्वानंतरमर्घ्यपात्रपवित्रांतर्हितेषुब्राह्मणहस्तेषुयादिव्याआपःपयसेत्यादिनामंत्रेणविश्वेदेवाइदंवोर्घ्यइत्यर्घ्योदकंविनिक्षिपेत् २३१ अथकरशौचार्थमुदकंदत्वायथाऋमंगंधपुष्पधूपदीपदानंकुर्यात् तथाच्छादनदानंचगंधादीनांस्मृत्यंतरोक्तोविशेषोद्रष्टव्यः चंदनकुंकुमकर्पूरागरुपद्मकान्युपलेपनार्थमितिविष्णुनोक्तं पुष्पाणिचश्राद्धेजात्याःप्रशस्ताःस्युर्मल्लिकाश्वेतयूथिकाजलोद्भवानिसर्वाणिकुमुमानिचचंपकमित्युक्तानिवर्ज्यानिचउग्रगंधीन्यगंधीनिचेत्यरक्षोद्भवानिच पुष्पाणिवर्जनीयानिरक्तवर्णानियानिच नकंटकिजंअकंटकमपि शुक्लंसुगंधियत्तद्ग्राह्यं नरक्तं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रक्तमपिकुंकुमंजलजंचदद्यादित्यादीनिद्रष्टव्यानि धूपेचविशेषोविष्णुनोक्तः प्राण्यंगंसर्वंधूपार्थेनदद्यात् घृतमधुसंयुक्तंगुग्गुलंश्रीखंडागरु
देवदारुसरलादिदद्यादिति दीपेचविशेषःशंखेनोक्तः घृतेनदीपोदातव्यस्तिलतैलेनवापुनः वसामेदाद्भवंदीपंप्रयत्नेनविवर्जयेत् आच्छादनं-
चशुभ्रंनवमहतंसदशंदद्यादिति एतच्चसर्वंवैश्वदेवानुष्ठानकांडमुदङ्मुखःकुर्यात् पित्र्यंकांडंदक्षिणामुखः यथाहवृद्धशातातपः उदङ्मुखस्तुदे
वानांपितॄणांदक्षिणामुखः प्रदद्यात्पार्वणेसर्वंदैवपूर्वंविधानतइति ३० ३१ ततोवैश्वदेवकांडानंतरमपसव्यंयज्ञोपवीतंप्राचीनावीतंकृत्वा

तथाच्छादनदानंचकरशौचार्थमंबुच अपसव्यंततःकृत्वापितॄणामप्रदक्षिणम् २३१ द्विगुणांस्तुकुशान्द
त्वाह्युशंतस्त्वेत्यृचापितॄन् आवाह्यतदनुज्ञातोजपेदायंतुनस्ततः २३२ अपहताइतितिलान्विकीर्यचस
मंततः यवार्थास्तुतिलैःकार्याःकुर्यादर्घ्यादिपूर्ववत् २३३

अत्रततइतिवदताकांडानुसमयोदर्शितः पित्रादीनांत्रया
णांअयुग्मान्कुशान्द्विगुणभुग्नान् अप्रदक्षिणंवामतोविष्टरार्थमासनेषूदकपूर्वकंदत्वापुनरुदकंदद्यात् अपःप्रदायद्विगुणभुग्नकुशान्दत्वा
पःप्रदायेत्याश्वलायनस्मरणात् एतच्चाद्यंतयोरुदकदानंवैश्वदेवेपित्र्येचप्रतिपदार्थप्रतिपादनार्थंद्रष्टव्यं अथपितॄन्पितामहान्प्रपितामहा
नावाहयिष्यइतिब्राह्मणान्स्पृष्ट्वा आवाहयेतितैरनुज्ञातोउशंतस्त्वानिधीमहीत्यनयाऋचापित्रादीनावाह्य आयंतुनःपितरइत्यादिना
मंत्रेणोपतिष्ठेत् २३२ २३३ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यवार्थायवसाध्यानिकार्याणि अन्ववकिरणादीनितिलैः कर्तव्यानि ततोर्घ्यपात्रासादनाच्छादनांतंपूर्ववत्कुर्यात् तत्रायंविशेषः तिलानपहता
सुरारक्षांसीत्यादिनामंत्रेणब्राह्मणान्परितोप्रदक्षिणमन्ववकीर्यराजतादिपात्रेषुत्रिष्वयुग्मकुशनिर्मितंकूर्चांतर्हितेषुशन्नोदेवीरितिमं
त्रेणापः क्षिप्त्वातिलोसिसोमदैवत्य इत्यादिमंत्रेणतिलान्पुष्पगंधानिचक्षिप्त्वास्वधार्घ्या इतिब्राह्मणानांपुरतोर्घ्यपात्राणिस्थापयित्वायादि
व्याइतिमंत्रांतेपितरिदंतेर्घ्यंपितामहेदंतेर्घ्यंप्रपितामहेदंतेर्घ्यंइतिब्राह्मणानांहस्तेष्वर्घ्यंदद्यात् एकैकमुभयत्रवेत्यस्मिन्नपिपक्षेपात्रत्रयं
कार्यं एवमर्घ्यंदत्वातेषामर्घ्याणांसंस्रवान्ब्राह्मणहस्तगलितार्घोदकानिपितृपात्रेगृहीत्वादक्षिणाग्रंकुशस्तंबंभूमौनिधायतस्योपरिपितृ-

दत्वार्घ्यंसंस्रवांस्तेषांपात्रेकृत्वाविधानतः पितृभ्यःस्थानमसीतिन्युब्जंपात्रंकरोत्यधः २३४
अग्नौकरिष्यन्नादायपृच्छत्यन्नंघृतप्लुतम् कुरुष्वेत्यभ्यनुज्ञातोहुत्वाग्नौपितृयज्ञवत् २३५

भ्यःस्थानमसीत्यनेनमंत्रेणतत्पात्रंन्युब्जमधोमुखंकुर्यात् तस्योपरिअर्घ्यपात्रपवित्राणिनिदध्यात् अनंतरंगंधपुष्पधूपदीपाच्छादनानि
पितरयंतेगंधः पितरिदंतेपुष्पंइत्यादिनाप्रयोगेणदद्यात् २३४ अनंतरमग्नौकरिष्यन्घृतप्लुतंघृतान्नमन्नमादायब्राह्मणान्पृच्छेदग्नौक
रिष्येइति घृतग्रहणंसूपशाकादिनिवृत्त्यर्थं ततस्तैः कुरुष्वेत्यभ्यनुज्ञाताप्राचीनावीत्यग्निमुपसमाधायमेक्षणेनादायावदानसंपदाजुहुयात् सो
मायपितृमतेस्वधानमः अग्नयेकव्यवाहनायस्वधानमइतिपिंडपितृयज्ञकल्पेनाग्नौहुत्वामेक्षणमनुप्रहृत्यहुतशेषंमृन्मयवर्जंयथालाभोपप

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नेषुविशेषतोरौप्येषुपित्र्यादिभाजनेषुदद्यात् नवैश्चदेवभाजनेषुसमाहितोनन्यमनस्कः अत्रयद्यप्यग्नावित्यविशेषेणोक्तं तथाप्याहिताग्नेः सर्वाधानपक्षेऽौपासनाग्नेरभावात् पिंडपितृयज्ञानंतरभाविनिपार्वणश्राद्धेविहितदक्षिणाग्नेःसन्निधानाद्दक्षिणाग्नौहोमः कर्मस्मार्तेविवाहाग्नावित्यस्यापवाददर्शनात् यथाहमार्कंडेयः आहिताग्निस्तुजुहुयाद्दक्षिणाग्नौसमाहितः अनाहिताग्निस्त्वौपासदेग्न्यभावेद्विजेष्ववेति अर्धाधानपक्षेत्वौपासनाग्निसद्भावादाहिताग्नेरनाहिताग्नेश्चौपासनाग्नावेवाग्नौकरणहोमः एवमन्वष्टकादिषुत्रिष्वपिपिंडपितृयज्ञकल्पातिदेशात् काम्यादिषुचतुर्षुब्राह्मणपाणावेवहोमः यथाहुर्गृह्यकाराः अन्वष्टक्यंचपूर्वेद्युर्मासिमासिस्यथपार्वणं काम्यमभ्युद-

हुनशेषंप्रदद्यात्तुभाजनेषुसमाहितः यथालाभोपपन्नेषुरौप्येषुचविशेषतः २३६

येष्टम्यामेकोद्दिष्टमथाष्टमं चतुर्ष्वाद्येषुसाग्नीनांवन्हौहोमोविधीयते पित्र्यब्राह्मणहस्तेस्यादुत्तरेषुचतुष्वपि अस्यार्थः हेमंतशिशिरयोश्चतुर्णामपरपक्षाणामष्टमीष्वष्टकाइत्यष्टकाविहिताः तत्रनवम्यांयत्क्रियतेतदन्वष्टक्यं सप्तम्यांक्रियमाणंपूर्वेद्युर्मासिमासिकृष्णपक्षेपंचमीप्रभृतिषुयस्याकस्यांचित्तिथावन्यष्टक्यादिदेशेनयद्विहितं अमावास्यायांपिंडपितृयज्ञानंतरंयद्विहितंतत्पार्वणंस्वर्गादिकामनायांकृत्तिकादिनक्षत्रेषुयद्विहितंतत्काम्यं अभ्युदयेषुपुत्रोत्पत्त्यादिषु तडागारामदेवताप्रतिष्ठादिषुचयद्विहितं अष्टम्यांया अष्टकाविहिता एकोद्दिष्टअत्रैकोद्दिष्टशब्देनसपिंडीकरणंलक्षयति तत्रैकोद्दिष्टस्यापिसद्भावात् नकेवलंपार्वणस्यसाक्षादेकोद्दिष्टतद्भावात् अथवागृह्यभाष्य

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कारमतेनसाक्षादेकोद्दिष्टेपिपाणिहोमस्यसद्भावात्साक्षादेकोद्दिष्टमेव एतेषामष्टानामाद्येषुचतुर्षुसाग्निकस्याग्नौहोमः उत्तरेषुचतुर्षु पित्र्यब्राह्मणहस्ते निरग्निकस्यापिप्रमीतपितृकस्यद्विजस्यपार्वणंनित्यमितिनस्यापिपाणावेवहोमः ननिर्वपतियःश्राद्धंप्रमीतपितृकोद्विजः इंदुक्षयेमासिमासिश्रायश्चित्तीयतेतुसइतिवचनात् एवंकाम्याभ्युदयिकाष्टकैकोद्दिष्टेषुपाणावेव अग्न्यभावेतुविप्रस्यपाणावेवोपपद्यतेदि तिमनुस्मरणात् पाणिदत्तस्यपृथग्ग्रासप्रतिषेधश्चदृश्यते यथाहुर्गृह्यकाराः अन्नंपाणितलेदत्तंपृथगभ्रंत्यबुद्धयः पितरस्तेनतृप्यंतिशेषा न्नंनलभंतिते यच्चपाणितलेदत्तंयच्चान्यदुपकल्पितं एकीभावेनसोक्तव्यंपृथग्भावोनविद्यतेइति २३५ २३६ अन्नमोदनसूपपायसघृता

दत्वान्नंपृथिवीपात्रमितिपात्राग्निमंत्रणम् कृत्वेदंविष्णुरित्यन्नेद्विजांगुष्ठंनिवेशयेत् २३७
सव्याहृतिकांगायत्रींमधुवाताइतिर्तृचम् जप्त्वायथासुखंवाच्यंभुज्यतामितिवाग्यताः २३८

दिकंभाजनेषुदत्वापृथिवीतेपात्रमित्यादिनामंत्रेणपात्राग्निमंत्रणंकृत्वाइदंविष्णुर्विचक्रमेइत्यनयाऋचाअन्नेद्विजांगुष्ठंनिवेशयेत् तत्रवैश्व देवेयज्ञोपवीतीविष्णोहव्यंरक्षेतिपित्र्येप्राचीनावीतीविष्णोकव्यंरक्षेति विष्णोहव्यंचकव्यंचब्रूयाद्रक्षेतिवैऋमादितिमनुस्मरणात् २३७
अनंतरंविश्वेभ्योदेवेभ्यइदमन्नंपरिविष्टंपरिवेक्ष्यमाणंचातृप्तेरितियवोदकेनदैवेनिवेद्य तथापित्रेअमुकगोत्रायामुकशर्मणेइदमन्नंप रिविष्टंपरिवेक्ष्यमाणंचातृप्तेरितितिलोदकप्रदानेनपित्रेनिवेद्य एवंपितामहायप्रपितामहायचनिवेद्यानंतरमापोशनंदत्वापूर्वोक्ताग्निर्व्या

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हृतिभिः सहितां गायत्रीं मधुवाता इति तृचं मधुमधुमध्विति त्रिवारं जप्त्वा यथासुखं जुषध्वमिति ब्रूयात् संकल्प्य पितृदेवेभ्यः सावित्रीं मधुमज्ज
पः श्राद्धं निवेद्यापोशानं जुषप्रैषोथ भोजनं तथा गायत्रीं त्रिः सकृद्वापि जपेद्व्याहृतिपूर्विकाम् मधुवाता इति तृचं मध्वित्येतत्त्रिकं तथेति पा
रस्करादिवचनात् भुंजीरंस्तेपि वाग्यताः तेपि ब्राह्मणा वाग्यता मौनिनो भुंजीरन् २३८ अन्नं भक्ष्यभोज्यलेह्यचोष्यपेयात्मकं पंचविधं इष्टं
यद्ब्राह्मणाय प्रेताय कर्त्रे वा रोचते हविष्यं श्राद्धहविर्योग्यं व्रीहिशालियवगोधूममुद्गमाषमुन्यन्नकालशाकमहाशल्कैलाशुंठीमरीचहिंगुगुडश
र्कराकर्पूरसैंधवमाम्रपनसनालिकेरकदलीबदरगव्यपयोदधिघृतपायसमधुमांसप्रभृतिस्मृत्यंतरप्रसिद्धं वेदितव्यं हविष्यमित्यनेनैवायोग्य-

अन्नमिष्टं हविष्यं च दद्यादक्रोधनोत्वरः आतृप्तेस्तु पवित्राणि जप्त्वा पूर्वजपं तथा २३९

स्य स्मृत्यंतरप्रतिषिद्धस्य कोद्रवमसूरचणककुलित्थपुलाकनिष्पावराजमाषकूश्मांडवार्ताकबृहतीद्वयोपोदकीवंशांकुरपिप्पलीवचाशतपु-
ष्पोषरविडालवणमाहिषचामरक्षीरदधिघृतपायसादीनां निवृत्तिः अक्रोधनः क्रोधहेतुसंभवेपि अत्वरो व्यग्रः आतृप्तेर्दद्यादिति संबंधः
तुशब्दाद्यथा किंचिदुच्छिष्यते तथा दद्यात् उच्छेषणस्य दासवर्गभागधेयत्वात् उच्छेषणं भूमिगतमजिह्मस्याशठस्य च दासवर्गस्य तत्पित्रे
भागधेयं प्रचक्षते इति मनुस्मरणात् तथा आतृप्तेः पवित्राणि पुरुषसूक्तपावमानीप्रभृतीनि जप्त्वा तृप्तान् ज्ञात्वा पूर्वोक्तं जपं च सव्याहृति
कामित्युक्तं जपेत् २३९ ७ ७ ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनंतरंसर्वमन्नमादायतृप्ताःस्थेतितान्पृच्छेत्तृप्ताःस्मइतितैरुक्तः शेषमप्यस्तिकिंक्रियतामितिस्मृच्छाइष्टैःसहोपभुज्यतामित्यभ्युपगम्य-
तदन्नंपितृस्थानब्राह्मणस्यपुरस्तादुच्छिष्टसन्निधौदक्षिणाग्रदर्भान्तरितायांभूमौतिलोदकप्रक्षेपपूर्वकंयेअग्निदग्धाइत्यनयाऋचानिक्षि-
प्यपुनस्तिलोदकंप्रक्षिपेत् तदनंतरंब्राह्मणहस्तेषुगंडूषार्थंसकृत्सकृदपोदद्यात् २४० पिंडपितृयज्ञकल्पातिदेशेनचरुश्रपणसद्भावे
अग्नौकरणशिष्टचरुशेषेणसहसर्वमन्नमुपादायाग्निसन्निधौपिंडान्दद्यात् तदभावेब्राह्मणार्थंकृतमन्नंसर्वमुपादायसलिलंनिलमिश्रंद

अन्नमादायतृप्ताःस्थशेषंचैवानुमान्यच्च तदन्नंविकिरेद्भूमौदद्याच्चापःसकृत्सकृत् २४० सर्वमन्नमुपादाय
सलिलंदक्षिणामुखः उच्छिष्टसन्निधौपिंडान्दद्याद्वैपितृयज्ञवत् २४१ मातामहानामप्येवंदद्यादाचमनंततः स्व
स्तिवाच्यंततः कुर्यादक्षय्योदकमेवच २४२ दत्वातुदक्षिणांशक्त्यास्वधाकारमुदाहरेत् वाच्यतामित्यनुज्ञातः प्र
कृतेभ्यःस्वधोच्यताम् २४३

क्षिणामुखः उच्छिष्टसन्निधौपिंडपितृयज्ञकल्पेनपिंडान्दद्यात् २४१ मातामहानामपिविश्वे
देवाबाहनादिपिंडप्रदानपर्यंतंकर्मएवमेवकर्तव्यं अनंतरंब्राह्मणानामाचमनंदद्यात् स्वस्तिवाच्यंततः कुर्यात्स्वस्तिब्रूतेतिब्राह्मणा
न्स्वस्तिवाचयेत् तैश्चस्वस्तीत्युक्तेअक्षय्यमस्त्वितिब्रूतेतिब्राह्मणहस्तेउदकदानंकुर्यात् नैश्चाक्षय्यमस्त्वितिवक्तव्यं २४२ अनंतरंय
थाशक्तिहिरण्यरजतादिदक्षिणांदत्वास्वधांवाचयिष्येइत्युक्तातेब्राह्मणैर्वाच्यतामित्यनुज्ञातः प्रकृतेभ्यःपित्रादिभ्यः मातामहादिभ्य-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

श्चस्वधोच्यतामितिस्वधाकारमुदाहरेत् २४३ तेचब्राह्मणाअस्तुस्वधेतिब्रूयुः तैरेवमुक्तेअनंतरंकमंडलुनाभूमौउदकंसिंचेत् ततोवि
श्वेदेवाःप्रीयंतामितिब्रूयात् ब्राह्मणैश्चप्रीयंतांविश्वेदेवाइत्युक्तंइदमनंतरोच्यमानंजपेत् २४४ दातारोहिरण्यादेःनोस्माकंकुलेभिवर्धंतांब
हवोभवंतु वेदाश्चवर्धंतांअध्ययनाध्यापनतदर्थज्ञानानुष्ठानद्वारेण संततिश्चपुत्रपौत्रादिपरंपरयाश्रद्धाचपित्रेकर्मण्यास्थानोस्माकंमाव्यगमत्
मागच्छतु देयंचहिरण्यादिबहुअपर्यंतं अस्माकंभवत्वितिजपेदित्यर्थः २४५ एवंपूर्वोक्तंप्रार्थनामंत्रंजप्त्वाउक्त्वाचप्रियावाचःधन्यावयंभवच्च

ब्रूयुरस्तुस्वधेत्युक्तेभूमौसिंचेत्ततोजलम् विश्वेदेवाश्चप्रीयंतांविप्रैश्चोक्तमिदंजपेत् २४४ दातारोनोभिवर्धतां
वेदाःसंततिरेवच श्रद्धाचनोमाव्यगमद्बहुदेयंचनोस्त्वि २४५ इत्युक्तोक्त्वाप्रियावाचःप्रणिपत्यविसर्जयेत् वाजेवा
जइतिप्रीतःपितृपूर्वंविसर्जनम् २४६ यस्मिंस्तेसंस्रवाःपूर्वमर्घ्यपात्रेनिवेशिताः पितृपात्रंतदुत्तानंकृत्वाविप्रान्विस
र्जयेत् २४७

रणयुगुलरजः पवित्रीकृतमस्मन्मंदिरंशाकाद्यशनक्लेशमविगणय्यभवद्भिरनुगृहीतावयमित्येवंरूपाःप्रणिपत्यप्रदक्षिणा
पूर्वंनमस्कृत्यविसर्जयेत् कथंविसर्जयेदित्याह वाजेवाजेवतवाजिनोनइत्यनयाऋचापितृपूर्वंप्रपितामहादिविश्वेदेवांतंदर्भान्वारंभेणउत्तिष्ठतपित
रइतिप्रीतःसुप्रीतमनाविसर्जनंकुर्यात् २४६ यस्मिन्नर्घपात्रेपूर्वमर्घ्यदानांतेसंस्रवाब्राह्मणहस्तगलितार्घ्योदकान्निनिवेशिताःस्थापिताः तत्पि
तृपात्रंन्युब्जंसदुत्तानमूर्ध्वमुखंकृत्वाविप्रान्विसर्जयेत् एतच्चाशीर्मंत्रजपादूर्ध्वंवाजेवाजेइत्यतःप्राक्द्रष्टव्यंकृत्वाविसर्जयेदितिक्त्वाप्रत्ययश्रवणात् २४७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अनंतरमासीमांतंब्राह्मणाननुव्रज्यतेषास्यतामित्यनुज्ञातः तान्प्रदक्षिणीकृत्य प्रतिनिवृत्तः पितृसेवितंश्राद्धशिष्टमिष्टैः सह भुंजीत नियमएवायंनपरिसंख्या मांसेतुयथारुचीतिहिजकाम्ययेत्यत्रोक्तं यस्मिन्दिनेश्राद्धंकृतंतत्संबंधिनींरात्रिंभोक्तृभिर्ब्राह्मणैः सह कर्ताब्रह्मचारीभवेत् तुशब्दात्पुनर्भोजनादिरहितोपिभवेत् दंतधावनतांबूलंस्त्रिग्धस्नानमभोजनं स्त्रीषधपरान्नानिश्राद्धकृत्सप्तवर्जयेत् पुनर्भोजनमध्वनोध्ययनमैथुनं दानंप्रतिग्रहंहोमंश्राद्धभुक्तुष्टवर्जयेदितियत्वनात् २४८ एवंपार्वणंश्राद्धमुक्त्वेदानींरुद्धिश्राद्धमाह वृद्धौपुत्रजन्मादिनिमित्तश्राद्धेएवमुक्तेनप्रकारेणपितॄन्यजेतपूजयेत् तत्रविशेषमाह प्रदक्षिणावृत्कइति प्रदक्षिणाआवृत् अनुष्ठानपद्धतिर्यस्यासौप्रद-

प्रदक्षिणमनुव्रज्य भुंजीतपितृसेवितम् ब्रह्मचारीभवेत्तांतु रजनींब्राह्मणैः सह २४८
एवंप्रदक्षिणावृत्कोवृद्धौनांदीमुखान्पितॄन् यजेतदधिकर्कंधुमिश्रान्पिंडान्यवैः क्रियाः २४९

क्षिणावृत्कः प्रदक्षिणप्रचारवृत्तियावत् नांदीमुखानितिपितॄणांविशेषणं अतश्चावाहनादौनांदीमुखान्पितॄनावाहयिष्ये नांदीमुखान्पितामहान्इत्यादिप्रयोगोद्रष्टव्यः कथंयजेतेत्याह दधिकर्कंधुमिश्रान् कर्कंधुर्बदरीफलं दध्नाबदरीफलेश्चमिश्रान्पिंडान्दत्वायजेतेतिसंबध्यते तिलसाध्याः सर्वाः क्रियायवैः कर्तव्याः अत्रचब्राह्मणसंख्यादर्शनेव युग्मान्देवेयथाशक्तीति अत्रप्रदक्षिणावृत्कत्वादिपरिगणनमन्येषामपिस्मृत्यंतरोक्तानांविशेषधर्माणांप्रदर्शनार्थं यथाहाश्वलायनः अथाप्युदाहरंतिकेब्राह्मणाः अमूलादर्भाः प्राङ्मुखोयज्ञोपवीतीस्यात्प्रदक्षिणमुपचा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रोयवैस्तिलार्थोगंधादिदानंहिर्हिः ऋजुदर्भानासनेदद्यात् यवोसिसोमदैवत्योगोसवोदेवनिर्मितः प्रत्नवद्भिः प्रत्नःपुष्टानांदीमुख्यान्पितॄन् इमाल्लोकान्प्रीणयाहिनःस्वाहेतियवावपनं विश्वेदेवाइदंवोर्घ्यंनांदीमुखाःपितरइदंवोर्घ्यमितियथालिंगमर्घ्यदानं पाणौहोमोग्नयेकव्यवाहनायस्वाहासोमायपितृमतेस्वाहेति मधुवाताऋतायतइतितृचस्थानेउपास्मैगायतेतिपंचममधुमतीः श्रावयेत् अक्षन्नमीमदंतेतिषष्ठीं आचांतेषुभुक्तवत्सुशयान्गोमयेनोपलिप्यप्राचीनाग्रान्दर्भान्संस्तीर्यतेषुपृषदाज्यमिश्रेणभुक्तशेषेणैकैकस्यहोर्द्वौपिंडौदद्यादित्यादि - यद्यपिपितॄन्यजेतेतिसामान्येनोक्तं तथापिश्राद्धत्रयंक्रमश्चस्मृत्यंतरादवगंतव्यः यथाहशातातपः मातुः श्राद्धंतुपूर्वंस्यात्पितॄणांतदनंतरं

एकोद्दिष्टंदैवहीनमेकार्घ्यैकपवित्रकम् आवाहनाग्नौकरणरहितंत्वपसव्यवत् २५०

ततोमातामहानांचवृद्धौश्राद्धत्रयंस्मृतमिति २४९ एकोद्दिष्टमाह एकोद्दिष्टं एकउद्दिष्टोयस्मिन्श्राद्धेतदेकोद्दिष्टमितिकर्मनामधेयं शेषंपूर्ववदाचरेदित्युपसंहारात् पार्वणसकलधर्मप्राप्तौविशेषोभिधीयते दैवरहितंविश्वेदेवरहितं एकार्घ्यपात्रमेकदर्भपवित्रकंच आवाहनाग्नौकरणहोमेनचरहितं अपसव्यवत्प्राचीनावीतब्रह्मसूत्रवत् अनेनानंतरोक्ताभ्युदयिकेयज्ञोपवीतित्वंसूचयति २५० किंच यदुक्तं स्वस्तिवाच्यंततः कुर्यादक्षय्योदकमेवचेति तत्राक्षय्यस्थानेउपतिष्ठतामितिवदेत् विप्रविसर्जनेकर्तव्येवाजेवाजइतिजपानंतरंदर्भान्वारभणेोक्षिरम्यतामितिब्रूयात् तेचाक्षिरंतांस्मेतिब्रूयुः हेतिप्रसिद्धंशेषंपूर्ववदितियावत् एतच्चमध्याह्नेकर्तव्यं यथाहदेवलः पूर्वाह्णेदैविकंक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्मअपराण्हेतुपैतृकं एकोद्दिष्टंतुमध्यान्हेप्रातर्वृद्धिनिमित्तकमिति भुंजीतपितृसेवितमित्यत्रैकोद्दिष्टविशेषनिषेधोदृश्यते नवश्राद्धेषुयच्छिष्टंगृहेपर्युषितंचयत् दंपत्योर्भुक्तशिष्टंचनभुंजीतकदाचनेति नवश्राद्धंतुदर्शितं प्रथमेन्हितृतीयेन्हिपंचमेसप्तमेतथा नवमेकादशेचैवतन्नवश्राद्धमुच्यते २५१ सपिंडीकरणमाह गंधोदकतिलैर्युक्तपात्रचतुष्टयंअर्घ्यसिद्ध्यर्थंपूर्वोक्तविधिनाकुर्यात् तिलैर्युक्तपात्रचतुष्टयंवदतापितृवर्गेचत्वारोब्राह्मणादर्शिताः वैश्वदेवेहोस्थितावेव अत्रप्रेतपात्रोदकंकिंचिद्वशेषंत्रिधाविभज्यपितृपात्रेषुसंचयेत् ये समानाः समनसइतिह्याभ्यांमंत्राभ्यांशेषंविश्वेदेवावाहनादिविसर्जनांतंपूर्ववत् पार्वणवदाचरेत् प्रेतार्घ्यपात्रावशिष्टोदकेनप्रेतस्थानब्रा

उपतिष्ठतामक्षय्यस्थानेविप्रविसर्जने अभिरम्यतामितिवदेद्भूयुक्तेभिरताःस्मह २५१

ह्मणहस्तेभ्यर्घदत्वाशेषमेकोद्दिष्टवत्समापयेत् पित्र्येषुत्रिषुपार्वणवत् एतत्सपिंडीकरणमनंतरोक्तमेकोद्दिष्टंचततःप्रागुक्तंस्त्रियाअपिमातुरपिकर्तव्यं एवंवदतापार्वणेमातृश्राद्धंपृथङ्नकर्तव्यमित्युक्तंभवति अत्रप्रेतशब्दंपितुःप्रपितामहविषयंकेचिद्वर्णयंति तस्यत्रिषंतर्भावेनसपिंडीकरणोत्तरकालंपिंडदानादिनिवृत्त्युपपत्तेः समनंतरमृतस्योत्तरत्रपिंडोदकदानानुवृत्तेरंतर्भावोनयुक्तः अतएवाह्ययमः यःसपिंडीकृतंप्रेतंपृथक्पिंडेनियोजयेत् विधिभ्रष्टेनभवतिपितृहाचोपजायतेइति प्रकर्षेणइतःप्रेतइतिचतुर्थेपिप्रेतशब्दोपपत्तेः प्रेतेभ्यएवनिवृणीयादितिचप्रयोगदर्शनात् अपिच सपिंडीकरणंश्राद्धंदेवपूर्वंनियोजयेत् पितृनेवाशयेत्तत्रपुनः प्रेतंननिर्दिशेदिति सपिंडीकरणो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नरकालंप्रेतस्यश्राद्धादिप्रतिषेधोदृश्यते सचानंतरमृतस्यनसंभवति अमावास्यादौश्राद्धविधानात् सपिंडनातुपुरुषेससमेविनिवर्त्तनइ
त्येतदपिवचनं चतुर्थस्यत्रिष्वंतर्भावएवघटते चतुर्थस्यपिंडत्रयव्यापित्वं पंचमस्यपिंडद्वयव्यापित्वम् षष्ठस्येकपिंडव्यापित्वं सप्तमेनिवृत्ति-
रिति पितृपात्रेष्वित्येतदपिपितृमुख्यत्वादस्मिन्नेवपक्षेघटते नान्यथा प्रपितामहप्रमुखत्वात् तस्मात्पितृपात्रेषुतत्प्रेतपात्रंप्रसिंचयेदिति
पितुःप्रपितामहपात्रंपित्रादिपात्रेषुप्रसेचयेदिति तदयुक्तं नत्वत्रपिंडसंयोजनमुत्तरत्रपिंडदानादिनिवृत्तिप्रयोजनं अपितुप्रेतत्वनिवृ
त्यापितृत्वप्राप्त्यर्थं प्रेतत्वंचक्षुत्तृषोपजनितात्यंतदुःखानुभावावस्था यथाह्मार्कंडेयः प्रेतलोकेतुवसतिर्नृणांवर्षंप्रकीर्तिता क्षुत्तृष्णोप्रत्य

गंधोदकतिलैर्युक्तंकुर्यात्पात्रचतुष्टयम् अभ्यर्थंपितृपात्रेषुप्रेतपात्रंप्रसिंचयेत २५२
येसमानाइतिह्यभ्याशेषपूर्ववदाचरेत् एतत्सपिंडीकरणमेकोद्दिष्टस्त्रियाअपि २५३

हंतत्रभवेतांभृगुनंदनेति पितृत्वप्राप्तिश्चवस्यादिश्राद्धदेवतासंबंधः प्राक्तनैकोद्दिष्टसहितेनसपिंडीकरणेनप्रेतत्वनिवृत्त्यापितृत्वंप्राप्नोती
त्यवगम्यते यस्यैतानिनदत्तानिप्रेतश्राद्धानिषोडश प्रेतत्वंचस्थिरंतस्यदत्तैःश्राद्धशतैरपि तथा चतुर्योनिर्वपेत्पिंडान्पूर्वेषुसमापयेत्त
तःप्रभृतिवैप्रेतः पितृसामान्यमश्नुतेइत्यादिवचनात् यःसपिंडीकृतंप्रेतमित्यनेनापिपृथगेकोद्दिष्टविधानेनपिंडदाननिषेधात्पार्वणविधाने
नसहपिंडदानमवगम्यते एतच्चसांवत्सरिकपाक्षिकैकोद्दिष्टविधानेनापद्यते यदपिपुनःप्रेतंननिर्दिशेदिति तदपिप्रेतशब्दंनोच्चारयेत्

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

अपितुपितृशब्दमेवेत्येवमत्यर्थं नचप्रकर्षगमनात्तत्रैवप्रेतशब्दः यतोविशिष्टदुःखानुभवावस्थाप्रेतशब्देनरूढ्याभिधीयतइत्युक्तं योपिप्र
मीतमात्रेप्रेतशब्दप्रयोगःसोपिभूतपूर्वगत्या सपिंडतातुपुरुषेसप्तमेविनिवर्ततइतिचप्रथमस्यपिंडस्यचतुर्थव्यापित्वात् द्वितीयस्यपंचमव्या
पित्वात्तृतीयस्यषष्ठव्यापित्वात् सप्तमेविनिवर्ततइतिएवमपिघटते अपिचनिर्वाप्यपिंडान्वयेननसापिंड्यं अव्यापकत्वात् अपित्वेकशरीरा
वयवान्वयेनेत्युक्तं पितृशब्दश्चप्रेतत्वनिवृत्त्याश्राद्धदेवतात्वमुपगतेषुवर्ततइति पितृपात्रेष्वित्यविरुद्धं तस्मादनंतरमृतपात्रोदकस्यतत्पिंड
स्यचपितृपात्रेषु तत्पिंडेषुचसंसर्जनमितिस्थितं आर्चायस्तुपरममतमेवोपन्यस्तवान् एतच्चपितुः सपिंडीकरणंपितामहादिषुत्रिषुप्रमी
तेषुवेदितव्यं पितरिप्रेतेपितामहेप्रपितामहेवाजीवतिसपिंडीकरणंनास्त्येव व्युत्क्रमाच्चप्रमीतानांनैवकार्यासपिंडनेतिवचनात् यत्तुमनुव
चनं पितायस्यतुवृत्तःस्याज्जीवेच्चापिपितामहः पितुःसनामसंकीर्त्यकीर्तयेत्प्रपितामहमिति तदपिपितृशब्दप्रयोगनियमायनपिंडद्वय
दानार्थं कथंध्रियमाणेतुपितरिपूर्वेषामेवनिर्वपेत् पितायस्यतुवृत्तःस्याज्जीवेच्चापिपितामहः सोपिपूर्वेषामेवनिर्वपेदित्यन्वयः पक्षद्वयेपि
कथंनिर्वपेदित्याह पितुःसनामसंकीर्त्यकीर्तयेत्प्रपितामहमित्याद्यंतग्रहणेनसर्वत्रपितृभ्यःपितामहेभ्यःप्रपितामहेभ्यइत्येवंप्रयोगः नपुनः
कदाचिदपिपितामहस्यप्रपितामहस्यवादित्वं वृद्धप्रपितामहस्यतत्पितुर्वांतत्वं अतश्चपित्रादिशब्दानांसंबंधिवचनात् ध्रियमाणेपितरि
पितुःपितृभ्यःपितामहेभ्यःप्रपितामहेभ्यइति पितामहेध्रियमाणेपितामहस्यपितृभ्यःपितामहेभ्यःप्रपितामहेभ्यइति अतःपिंडपितृयज्ञे
शुंधंतांपितरइत्यादिमंत्राणामूहोनभवति यदपिविष्णुवचनं यस्यपिताप्रेतःस्यात्सपितृपिंडंनिधायपितामहात्पराभ्यांद्वाभ्यांदद्यादिति त-
स्यायमर्थः पितामहेध्रियमाणेप्रेतेचपितरिपितुरेकंपिंडमेकोद्दिष्टविधानेननिधायपितुर्यःपितामहस्तत्पराभ्यांद्वाभ्यांदद्यात् पितामह-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

स्त्वात्मनः प्रपितामहः संप्रदानभूतः स्थित एवेति प्रपितामहाय ततः पराभ्यां द्वाभ्यां च दद्यादिति शब्दप्रयोगनियमस्तु पूर्वोक्त एव एवं गोब्रा
ह्मणादिहतस्यापि सपिंडीकरणाभावो वेदितव्यः यथाह कात्यायनः ब्राह्मणादिहते ताते पतिते संगवर्जिते व्युत्क्रमाच्च मृते देयं येभ्य एव द
दात्यसाविति गोब्राह्मणहतस्य पितुः सपिंडीकरणाभावे तमुल्लंघ्य पितामहादिभ्यः पार्वणविधानमुपपन्नमिति सपिंडीकरणाभावो वगम्यते
स्मृत्यंतरेपि ये नराः संततिच्छिन्ना नास्ति तेषां सपिंडता न चैतैः सह कर्तव्यान्येकोद्दिष्टानि षोडशेति मातुः पिंडदानादौ गोत्रे विप्रतिपत्तिः भर्तृ
गोत्रेण पितृगोत्रेण वा दातव्यमिति उभयत्र वचनदर्शनात् स्वगोत्राद्भ्रश्यते नारी विवाहात्सप्तमे पदे स्वामिगोत्रेण कर्तव्या तस्याः पिंडोदकक्रि-
येत्यादि भर्तृगोत्रविषयं वचनं पितृगोत्रं समुत्सृज्य न कुर्याद्भर्तृगोत्रतः जन्मन्येव विपत्तौ च नारीणां पैतृकं कुलमित्यादि पितृगोत्रविषयं एवं वि-
प्रतिपत्तावासुरादिविवाहेषु पुत्रिकाकरणे च पितृगोत्रमेव तत्र तत्र विशेषवचनात् दानस्यानिवृत्तेश्च ब्राह्मादिविवाहेषु व्रीहियववत् बृहद्रथंत
रसामवत् विकल्प एव तत्र च येनास्य पितरो याता येन याताः पितामहाः तेन यायात्सतां मार्गं तेन गच्छन्न दुष्यतीति वचनात् वंशपरंपरायातस-
माचरणेन व्यवस्था एवंविधविषयव्यतिरेकेणास्य वचनस्य विषयांतराभावात् यत्र पुनः शास्त्रतो न व्यवस्था नाप्याचारतस्तत्रात्मनस्तुष्टिरेव वे
ति वचनादात्मनस्तुष्टिरेव व्यवस्थापिका यथा गर्भाष्टमेऽष्टमे वाब्द इति मातुः सपिंडीकरणेपि विरुद्धानीव वाक्यानि दृश्यंते तत्र पितामह्या-
दिभिः सार्द्धं सपिंडीकरणं स्मृतं तथा भर्त्रापि भार्यायाः स्वमात्रादिभिः सह सपिंडीकरणं कर्तव्यमिति पैठीनसिराह अपुत्रायां मृतायां तु पतिः
कुर्यात्सपिंडतां श्वश्र्वादिभिः सहैवास्याः सपिंडीकरणं भवेदिति पत्या सह सपिंडीकरणं यम आह पत्या चैकेन कर्तव्यं सपिंडीकरणं स्त्रियाः सा
मृतापि हि तेनैक्यं गता मंत्राहुतिव्रतैरिति उशनसा तु मातामहेन सपिंडीकरणमुक्तं पितुः पितामहे यद्वत्पूर्णे संवत्सुरे सुतैः मातुर्मातामहे तद्व

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

देषाकार्यासपिंडता तथा पितापितामहेयोज्यः पूर्णेसंवत्सरेसुतैः मातामातामहेतद्वदित्याहभगवान्शिवइत्येवंविविधेषुवचनेषुसत्सुअपुत्रा
यांभार्यायांप्रमीतायांभर्त्तास्वमात्रैवसापिंड्यंकुर्यात् अन्वारोहणेतुपुत्रः स्वपित्रैवमातुःसापिंड्यंकुर्यात् आसुरादिविवाहोत्पन्नः पुत्रिकासु
तश्चमातामहेनैवब्राह्मादिविवाहोत्पन्नः पित्रामातामहेनपितामह्यावाविकल्पेनकुर्यात् अत्रापियदिनियतोवंशसमाचारस्तदानींतथैवकुर्या
त् वंशसमाचारोप्यनियतश्चेत्तदात्मनस्तुष्टिरेवचेतियथारुचिकुर्यात् तत्रचयेनकेनापिमातुःसापिंड्येपियत्रान्वष्टकादिषुमातृश्राद्धंपृथक्
विहितं अन्वष्टकासुवृद्धौचगयायांचक्षयेहनि मातुःश्राद्धंपृथक्कुर्यादन्यत्रपतिनासह तत्रपितामह्यादिभिरेवपार्वणश्राद्धंकर्तव्यं अन्यत्र
पतिनासहेतिपतिसापिंड्येतदंशभागित्वात् मातामहसापिंड्येतदंशभागित्वात्तेनैवसह यथाहशातातपः एकमूर्तित्वमायातिसपिंडीकर
णेकृते पत्नीपतिपितॄणांचतस्मादंशेनभागिनीति एवंसतिमातामहेनमातुःसापिंड्येमातामहश्राद्धंपितृश्राद्धवन्नित्यमेव पत्यापिताम
ह्यावामातुःसापिंड्येमातामहश्राद्धंननित्यंकृतेअभ्युदयः अकृतेनप्रत्यवायइतिनिर्णयः २५२ २५३ संवत्सरादर्वाक्सपिंडीकरणंय-
स्यकृतंतस्यतदुद्देशेनप्रतिदिवसंप्रतिमासंवायावत्संवत्सरंशक्त्यनुसारेणान्नमुदकुंभसहितंब्राह्मणायदद्यात् अर्वाक्संवत्सरादितिवदता-
सपिंडीकरणंसंवत्सरेपूर्णेप्राग्वेतिदर्शितं यथाहाश्वलायनः अथसपिंडीकरणंसंवत्सरांतेद्वादशाहेवेति कात्यायनोप्याह ततःसंवत्सरेपू
र्णेसपिंडीकरणंभवेत् त्रिपक्षेवायदाचार्वाग्वृद्धिरापद्यतेतदेति द्वादशाहेत्रिपक्षेवृद्धिप्राप्तौसंवत्सरेवेतिचत्वारःपक्षादर्शिताः तत्रद्वा
दशाहेपितुःसपिंडीकरणंसाग्निकेनकार्यं सपिंडीकरणंविनापिंडपितृयज्ञासिद्धेःसाग्निकस्तुयदाकर्ताप्रेतोवाप्यग्निमान्भवेत् द्वादशाहे
तदाकार्यंसपिंडीकरणंपितुरितिवचनात् निरग्निस्तुत्रिपक्षेवृद्धिप्राप्तौसंवत्सरेवाकुर्यात् यदाप्राक्संवत्सरात्सपिंडीकरणंतदाषोडशश्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

ह्यानिकृत्वासपिंडीकरणंकार्यं उतसपिंडीकरणंकृत्वास्वस्वकालेतानिकर्तव्यानीतिसंशयः उभयथावचनदर्शनात् श्राद्धानिषोडशादत्यानतुकुर्यात्सपिंडनम् श्राद्धानिषोडशापाद्यविदधीतसपिंडनामिति षोडशश्राद्धानिचद्वादशाहेत्रिपक्षेचषण्मासेमासिचाब्दिके श्राद्धानिषोडशैतानिसंस्मृतानिमनीषिभिरितिदर्शितानि तथा यस्यापिवत्सरादर्वाक्सपिंडीकरणंभवेत् मासिकंचोदकुंभंचदद्यात्तस्यापिवत्सरमिति तत्रसपिंडीकरणंकृत्वास्वकालएवैतानिकर्तव्यानीतिप्रथमःकल्पः अप्राप्तकालत्वेनप्रागनधिकारात् यदपिवचनंषोडशश्राद्धानिकृत्वासपिंडीकरणंसंवत्सरात्प्रागपिकर्तव्यमितिसोयमापत्कल्पः यदात्वापत्कल्पत्वेनप्राक्सपिंडीकरणात् प्रेतश्राद्धानिकरोतितदैकोद्दिष्टविधानेनकुर्यात् यदानुमुख्यक

अर्वाक्सपिंडीकरणंयस्यसंवत्सराद्भवेत् तस्याप्यन्नंसोदकुंभंदद्यात्संवत्सरंद्विजे २५४

ल्पेनस्वकालएवकरोतिनदाब्दिकंश्राद्धंयोयथाकरोतिपार्वणमेकोद्दिष्टंवातथामासिकानिकुर्यात् सपिंडीकरणादर्वाकुर्वन्श्राद्धानिषोडशएकोद्दिष्टविधानेनकुर्यात्सर्वाणितानितु सपिंडीकरणाद्ध्वंयदाकुर्यात्तदापुनः प्रत्यब्दंयोयथाकुर्यात्तथाकुर्यात्सतान्यपीतिस्मरणात् एतच्चप्रेतश्राद्धसहितंसपिंडीकरणंसविभक्तधनेषुबहुषुभ्रातृषुसत्स्वप्येकेनैवकृतेनालंनसर्वैः कर्तव्यं नवश्राद्धंसपिंडत्वंश्राद्धान्यपिचषोडशएकेनैवतुकार्याणिसंविभक्तधनेष्वपीतिस्मरणात् इदंचप्रेतश्राद्धसहितंसपिंडीकरणंअसंन्यासिनांपुत्रादिभिर्नियमेनकर्तव्यं प्रेतत्वविमोक्षार्थत्वात् संन्यासिनांतुनकर्तव्यंयथाहोशनाः एकोद्दिष्टेनकुर्वीतयतीनांचैवसर्वदा अहन्येकादशेप्राप्तेपार्वणंतुविधीयते सपिंडीकरणं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तेषांनकर्तव्यंसुतादिभिः त्रिदंडग्रहणादेवप्रेतत्वंनैवजायतेइति पुत्रासंनिधानेयेनसगोत्रादिनादाहसंस्कारः कृतस्तेनैवादशाहांतंतत्प्रेतकर्मकर्तव्यं असगोत्रःसगोत्रोवास्त्रीद्यादद्यादिवापुमान् प्रथमेहनियोदध्यात्सदशाहंसमापयेदितिस्मरणात् शूद्राणामप्येतत्कर्तव्यममंत्रकं द्वादशेन्हि एवंसपिंडीकरणंमंत्रवर्ज्यंशूद्राणांद्वादशेन्हीतिविष्णुस्मरणात् सपिंडीकरणादूर्ध्वंसांवत्सरिकपार्वणादीनिपुत्रस्यनियमेनैवकार्याणि अन्येषामनियतानि २५४ एकोद्दिष्टकालानाह मृतेहनिप्रतिमासंसंवत्सरंयावदेकोद्दिष्टकार्यं आद्यंसर्वैकोद्दिष्टप्रकृतिभूतमेकोद्दिष्टमेकादशेहनि मृतदिवसापरिज्ञानेतच्छ्रवणदिवसेअमावास्यायांवाकार्यं अपरिज्ञातेमृतेहनिअमावास्यायांश्रवणदिवसेवेतिस्मरणात्

मृतेहनितुकर्तव्यंप्रतिमासंतुवत्सरम् प्रतिसंवत्सरंचैवमाद्यमेकादशेहनि २५५

अमावास्यायामितिगमनमासंबंधिन्यामावास्यायामिति प्रगासदिवसेदेयंतन्मासेंदुक्षयेपिवेतिस्मरणात् मृतेहनीत्यत्राहिताग्नेर्विशेषोजातूकर्ण्येनोक्तः ऊर्ध्वंत्रिपक्षाद्यच्छ्राद्धंमृतेहन्येवतद्भवेत् अधस्तुकारयेद्यावादाहिताग्नेर्द्विजन्मनइति तत्रत्रिपक्षादूर्ध्वंयत्प्रेतकर्मतद्दाहदिवसादारभ्याहिताग्नेःकार्यं त्रिपक्षादूर्ध्वंयच्छ्राद्धंतन्मरणदिवसएवेत्यर्थः अनाहिताग्नेस्तुसर्वंमृताहएव आद्यमेकादशेहनीत्याशौचोपलक्षणमितिकेचित् शुचिनाकर्मकर्तव्यमितिशुद्धेरंगत्वात् अथाशौचापगमइतिसामान्येनसर्वेषांवर्णानामुपक्रम्यैकोद्दिष्टस्यविष्णुनाविहितत्वाच्च तदयुक्तं एकादशेह्नियच्छ्राद्धंतत्सामान्यमुदाहृतम् चतुर्णामपिवर्णानांसूतकंचपृथग्पृथगितिपैठीनसिस्मरणविरोधात् आद्यश्रा

५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

हमशुद्धोपिकुर्यादेकादशेहनि कर्तुस्तात्कालिकीशुद्धिरशुद्धः पुनरेवसइतिशंखवचनविरोधाच्च सामान्योपक्रमंविष्णुवचनंदशाहाशौचविषय
मपिघटते प्रतिसंवत्सरंचैवमितिप्रतिसंवत्सरमृतेहनिएकोद्दिष्टमुपदिष्टयोगीश्वरेण तथाचस्मृत्यंतरं वर्षेवर्षेतुकर्तव्यामातापित्रोस्तुसक्रिया
अदेवंभोजयेच्छ्राद्धंपिंडमेकंचनिर्वपेदिति यमोप्याह सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंसुतः मातापित्रोः पृथक्कुर्यादेकोद्दिष्टमृतेहनीति
व्याससंतुपार्वणंप्रतिषेधति एकोद्दिष्टंपरित्यज्यपार्वणंकुरुतेनरः अकृतंतद्विजानीयाद्भवेच्चपितृघातकइति जमदग्निस्तुपार्वणमाह अपा
द्यन्वसपिंडत्वमौरसोविधिवत्सुतः कुर्वीतदर्शवच्छ्राद्धंमातापित्रोः क्षयेहनीति शातातपोप्याह सपिंडीकरणंकृत्वाकुर्यात्पार्वणवत्सदा प्रतिसंव
त्सरंविद्वांश्छागलेयोदितोविधिरित्येववचनंविप्रतिपन्नोदाक्षिणात्यास्त्वेवंव्यवस्थामाहुः औरसक्षेत्रजाभ्यांमातापित्रोः क्षयाहे पार्वणमेवकर्त
व्यं दत्तकादिभिरेकोद्दिष्टमितिजातूकर्ण्यवचनात् प्रत्यब्दंपार्वणेनैवविधिनाक्षेत्रजौरसौकुर्यातामितरेकुर्युरेकोद्दिष्टंसुताद्दशेति तदसत् न-
त्यत्रक्षयाहवचनमस्ति अपितुप्रत्यब्दमिति संतिचक्षयाहव्यतिरिक्तानिप्रत्यब्दंश्राद्धानि अक्षय्यतृतीयामाघीवैशाखीप्रभृतिषु अतोनक्षया
हविषयपार्वणैकोद्दिष्टव्यवस्थापनायालं यत्तुपराशरवचनं पितुर्गतस्यदेवत्वमौरसस्यत्रिपौरुषं सर्वत्रानेकगोत्राणामेकस्मैवमृतेह
नीति तदपिनव्यवस्थापकं यस्मादयमर्थः देवत्वंगतस्यसपिंडीकृतस्यपितुः सर्वत्रौरसेनत्रिपौरुषंपार्वणंकार्यं अनेकगोत्राणांभिन्नगो
त्राणांमातुलादीनांक्षयेहनियच्छ्राद्धंतदेकस्मैवैकोद्दिष्टमेवेति किंच सपिंडीकरणादूर्ध्वमप्येकोद्दिष्टमेवकर्तव्यमौरसेनापीत्युक्तंपैठीन-
सिना एकोद्दिष्टंहिकर्तव्यमौरसेनमृतेहनि सपिंडीकरणादूर्ध्वंमातापित्रोर्नपार्वणमिति उदीच्याः पुनरेवंव्यवस्थापयंति अमावास्यायां-
माद्रपदकृष्णपक्षेवामृताहेपार्वणमन्यत्रमृताह एकोद्दिष्टमेवेति अमावास्यांक्षयोयस्यप्रेतपक्षेथवापुनः पार्वणंतत्रकर्तव्यंनैकोद्दिष्टक

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दाचनेतिस्मरणात् तदपिनाद्रीयंतेऽद्धाः अनिश्चितमूलेनानेनवचनेननिश्चितमूलानांबहूनांक्षयाहमात्रपार्वणविषयाणांवचनानामभावा
स्याप्रेतपक्षमृताहविषयत्वेनातिसंकोचस्यायुक्तत्वात् सामान्यवचनानर्थक्याच्च तत्रहिसामान्यवचनस्यविशेषोपवचनेनोपसंहारः यत्रसा
मान्यविशेषसंबंधज्ञानेनवचनद्वयमर्थवत् यथासप्तदशसामिधेनीरनुब्रूयादित्यनारभ्याधीतस्यधिकृतिमात्रविषयस्यसप्तदशवाक्यस्य
सामिधेनीलक्षणद्वारसंबंधेनार्थवशात् मित्रविंदादिप्रकरणपठितेनपंचदशवाक्येनमित्रविंदाद्यधिकारात्पूर्वसंबंधबोधेनार्थवन्मित्रविंदा
दिप्रकरणोपसंहारः इहतुद्वयोर्मृताहमात्रविषयत्वान्नार्थवत्तेति अतोत्रपाक्षिकैकोद्दिष्टनिवृत्तिफलकतयापार्वणनियमविधानंयुक्तं न
चैकोद्दिष्टवचनानांमातापितृक्षयाहविषयत्वेनपार्वणवचनानांचतदन्यक्षयाहविषयत्वेनव्यवस्थायुक्ता उभयत्रापिमातापितृसुतग्र
हणस्याविद्यमानत्वात् सपिंडीकरणादूर्ध्वंप्रतिसंवत्सरंसुतैः मातापित्रोः पृथक्कार्यमेकोद्दिष्टमृतेहनीति तथा आपाद्यसहपिंडत्वमोरसोविधि
वत्सुतः कुर्वीतदर्शवच्छ्राद्धंमातापित्रोःक्षयेहनीति यदपिकेश्चिदुच्यते मातापित्रोःक्षयाहेसाग्निः पार्वणंकुर्यान्निरग्निरेकोद्दिष्टमिति वर्षे
वर्षेसुतःकुर्यात्पार्वणंयोग्निमान्द्विजः पित्रोरनग्निमान्धीरएकोद्दिष्टंमृतेहनीतिस्मृतुस्मरणात् तदपिसत्प्रतिपक्षत्वादुपेक्षणीयं बह्वग्न-
यस्तुयेविप्रायेचैकाग्नयएवच तेषांसपिंडनादूर्ध्वमेकोद्दिष्टेनपार्वणमितिस्मरणात् तत्रैवंनिर्णयः सन्यासिनांक्षयाहेसुतेनपार्वणमेवक
र्तव्यं एकोद्दिष्टंयतेर्नास्तित्रिदंडग्रहणादिह सपिंडीकरणाभावात्पार्वणंतस्यसर्वदेतिप्रचेतसःस्मरणात् अमावास्यायांक्षयाहेप्रेतपक्षक्षया
हेचपार्वणमेव अमावास्यांक्षयोयस्यप्रेतपक्षेथवापुनरित्यादिवचनस्योक्तरीत्यानियमपरत्वात् अन्यत्रक्षयाहेपार्वणेकोद्दिष्टयोर्ग्रहियव
वद्विकल्पएव तथापिवंशसमाचारव्यवस्थायांसत्यांव्यवस्थितोविकल्पः असत्यामिच्छेत्यलमतिप्रसंगेन २५५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नित्यश्राद्धव्यतिरिक्तसर्वश्राद्धशेषमिहाभिधीयते पूर्वदत्तानांपिंडानांपिंडस्थवाप्रतिपत्तिरियंगवेअजायब्राह्मणायवातदर्थिनेपिंडान्ददात् अग्नावगाधेजलेवाप्रक्षिपेत् किंच सत्सुविप्रेषुभोजनदेशावस्थितेषुहिजोच्छिष्टंनमार्जयेत् नोद्वासयेत् २५६ भोज्यविशेषेणफलविशेष माह हविष्यंहविर्योग्यंतिलव्रीत्यादि यथाहमनुः तिलैर्व्रीहियवैर्माषैरद्भिर्मूलफलेनवा दत्तेनमासंप्रीयंतेविधिवत्पितरोनृणामिति तदन्नं हविष्यान्नतेनमासंपितरस्तृप्यंतीत्यनागतेनान्वयः पायसेनगव्यपयःसिद्धेनसंवत्सरं संवत्सरंतुगव्येनपयसापायसेनचेतिस्मरणात् मत्स्यो

पिंडोस्तुगोजविप्रेभ्योदद्यादग्नौजलेपिवा प्रक्षिपेत्सत्सुविप्रेषुहिजोच्छिष्टंनमार्जयेत् २५६ हवि ष्यान्नेनवैमासंपायसेनतुवत्सरम् मात्स्यहारिणकौरभ्रशाकुनच्छागपार्षतैः २५७ एणरौरव वाराहशाशैर्मासैर्यथाक्रमम् मासवृद्ध्याप्रितृप्यंतिदत्तैरिहपितामहाः २५८

भक्ष्यः पाठीनादिस्तस्येदंमात्स्यं हरिणस्ताम्रमृगः एणः कृष्णः एणः कृष्णमृगोज्ञेयस्ताम्रोहरिणउच्यतेइत्यायुर्वेदस्मरणात् तस्येदंहारि णकं उरभ्रः अविस्तत्संबंधिऔरभ्रं शाकुनंभक्ष्यपक्षिसंबंधि छागः अजस्तदीयं छागं पृषच्चित्रमृगस्तन्मांसंपार्षतं एणः कृष्णमृगस्त त्संबंधिनैणं रुरुः शंबरस्तत्प्रभवंरौरवं वराहआरण्यसूकरस्तज्जंवाराहं शशस्येदंशाशं एभिर्मांसैःपितृभ्योदत्तैर्हविष्यान्नेनयेमास मित्युक्तत्वान्नतऊर्ध्वंयथाक्रमंएकैकमासवृद्ध्यापितरस्तृप्यंति २५७ २५८ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

किंच खड्गोगंडकस्तस्यमांसं महाशल्कोमत्स्यभेदः मधुमाक्षिकंमुन्यन्नंसर्वमारण्यंनीवारादि लोहोरक्तच्छागः तदामिषंलोहामिषं महाशा
कंकालशाकं वाध्रीणसोवृद्धः श्वेतच्छागः त्रिपिबंत्रिंद्रियक्षीणश्चेतवृद्धमजापतिंवाध्रीणसंनुतंप्राहुर्याज्ञिकाः श्राद्धकर्मणीतियाज्ञिकप्रसि
द्धः त्रिपिबःपिबतः कर्णौजिह्वाचयस्यजलंस्पृशतिसत्रिपिः पिबतीतित्रिपिबः तस्यवाध्रीणसस्यमांसंयद्दाति गयास्थश्चयत्किंचिच्छा
खादिकमपिगयास्थोददाति चशब्दाद्गंगाद्वारादिषुच गंगाद्वारेप्रयागेचनैमिषेपुष्करेबुदे संनिहत्यांगयायांचश्राद्धमक्षय्यतांव्रजेत् आनंत्य
मश्नुतइति अनंतफलहेतुतंप्राप्नोति आनंत्यमश्नुतइतिप्रत्येकंसंबध्यते तथावर्षात्रयोदश्यांभाद्रपदकृष्णात्रयोदश्यांविशेषतोमघायुक्तायां

खड्गामिषंमहाशल्कंमधुमुन्यन्नमेवच लोहामिषंमहाशाकंमांसंवाध्रीणसस्यच २५९
यद्ददातिगयास्थश्चसर्वमानंत्यमश्नुते तथावर्षात्रयोदश्यांमघासुचविशेषतः २६०

यत्किंचिद्दीयतेतत्सर्वमानंत्यमश्नुतइतिगतेनसंबंधः अत्रयद्यपिमुन्यन्नमांसमध्यादीनिसर्ववर्णानांसामान्येनश्राद्धेयोग्यानिदर्शितानितथा
पिपुलस्त्योक्ताव्यवस्थाआदरणीया मुन्यन्नंब्राह्मणस्योक्तंमांसंक्षत्रियवैश्ययोः मधुप्रदानंशूद्रस्यसर्वेषांचाविरोधियदिति अस्यायमर्थः मुन्यन्नं
नीवारादियच्छ्राद्धयोग्यमुक्तंतद्ब्राह्मणस्यप्रधानंसमग्रफलदं यच्चमांसमुक्तंतत्क्षत्रियवैश्ययोःप्रधानं यत्क्षौद्रमुक्तंतच्छूद्रस्य एतन्नियम्यते
रिक्तंयदविरोधियदप्रतिषिद्धं वास्मृकादि यच्चविहितंहविष्यंकालशाकादितत्सर्वेषांसमग्रफलदमिति २५९ २६० ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिथिविशेषात्फलविशेषमाह कन्यांरूपलक्षणशीलवतीं कन्यावेदिनोजामातरः बुद्धिरूपलक्षणसंपन्नाः पशवःक्षुद्राः अजादयः सत्सुताःसन्मार्गवर्तिनः द्यूतंद्यूतविजयः कृषिः कृषिफलं वाणिज्यंवाणिज्यलाभः द्विशफागवादयः एकशफाअश्वादयः ब्रह्मवर्चस्विनःपुत्राः वेदाध्ययनतदर्थानुष्ठानजनितंतेजोब्रह्मवर्चसंनहंतः स्वर्णरूप्येहेमरजते तद्व्यतिरिक्तंत्रपुसीसादिकुप्यकं जातिश्रैष्ठ्यजातिषूत्कृष्टत्वं सर्वकामाः काम्यंतइतिकामाः स्वर्गपुत्रपश्वादयः एतानिकन्यादीनिचतुर्दशफलानिकृष्णप्रतिपत्प्रभृतिष्वमावास्यापर्यंतासुचतुर्दशीवर्जितासुचतुर्दशसुतिथिषुश्राद्धंदोयथाक्रममाप्नोति येकेचनशस्त्रहतास्तेभ्यः कृष्णाचतुर्दश्यामेकोद्दिष्टविधिनाश्राद्धंदद्यात् यदिब्राह्मणादिहतानभवंति सम

कन्यांकन्यावेदिनश्चपशून्वैसत्सुतानपि द्यूतंकृषिंचवाणिज्यंद्विशफैकशफंतथा २६१ ब्रह्मवर्चस्विनःपुत्रान्स्वर्णरूप्येसकुप्यके जातिश्रैष्ठ्यंसर्वकामानाप्नोतिश्राद्धदःसदा २६२ प्रतिपत्प्रभृतिष्वेकांवर्जयित्वाचतुर्दशीम् शस्त्रेणतुहतायैतेभ्यस्तत्रप्रदीयते २६३

त्वमागतस्यापिपितुःशस्त्रहतस्यवै एकोद्दिष्टंसुतैःकार्यंचतुर्दश्यांमहालये इतिस्मरणात् समत्वमागतस्यसपिंडीकृतस्यमहालयेभाद्रपदकृष्णचतुर्दश्यांशस्त्रहतस्यैवश्राद्धंनान्यस्येतिनियम्यते नपुनःशस्त्रहतस्यचतुर्दश्यामेवेति अतश्चक्षयाहादौशस्त्रहतस्यापियथाप्राप्तमेवश्राद्धं नचभाद्रपदकृष्णपक्षएवायंविधिरितिमंतव्यं प्रोष्ठपद्यामपरपक्षेमासिमासिचैवमितिशौनकस्मरणात् २६१ २६२ २६३ नक्षत्रविशेषात्फलविशेषमाह कृत्तिकादिंकृत्वास्मरण्यंतंप्रतिन

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

क्षत्रंयः श्राद्धं ददातिसयथाक्रमंस्वर्गादीनायुःपर्यंतान्कामानवाप्नोति यद्यास्तिकः श्रद्दधानश्चेत् व्यपेतमदमत्सरोभवति आस्तिकोविश्वा
सवान् श्रद्दधानः आदरातिशययुक्तः व्यपेतमदमत्सरः मदोगर्वः मत्सरईर्ष्या ताभ्यांरहितः स्वर्गेनिरतिशयसुखं अपत्यमविशेषेण ओ
जःआत्मशक्त्यतिशयः शौर्येनिर्भयत्वं क्षेत्रंफलवत् बलंशारीरं पुत्रोगुणवान् श्रेष्ठंजातिषु सौभाग्यंजनप्रियता समृद्धिर्धनादेः मुख्यता अ
ग्र्यता शुभसामान्येन प्रवृत्तचक्रता अप्रतिहताज्ञता वाणिज्यप्रभृतयः वाणिज्यकृषिकुसीदगोरक्षाः अरोगित्वंअनामययोगित्वं यशःप्रख्या

स्वर्गंत्वपत्यमोजश्चशौर्यंक्षेत्रंबलंतथा पुत्रंश्रैष्ठ्यंससौभाग्यंसमृद्धिंमुख्यतांशुभम् २६४ प्रवृत्तचक्रतांचैव
वाणिज्यप्रभृतीनपि अरोगित्वंयशोवीतशोकतांपरमांगतिम् २६५ धनंवेदान्भिषक्सिद्धिं कुप्यंगाश्चाप्यजाविकां
अश्वानायुश्चविधिवद्यःश्राद्धंसंप्रयच्छति २६६ क्लृप्तिकादिभरण्यंतंसकामानाप्नुयादिमान् आस्तिकः श्रद्दधान
श्चव्यपेतमदमत्सरः २६७

तिः वीतशोकताइष्टवियोगादिजनितदुःखाभावः परमागतिः ब्रह्मलोकप्राप्तिः धनंसुवर्णादिवेदा
ऋग्वेदादयः भिषक्सिद्धिः औषधफलावाप्तिः कुप्यंसुवर्णरजतव्यतिरिक्तं ताम्रादिगावः प्रसिद्धाः अजाश्चअवयश्च अश्वाश्च आयुर्दीर्घजीव
नं मासरध्याभितृप्यंतिदत्तेरिह पितामहाइत्यनेनपितॄणांश्राद्धेननृप्तिर्भवतीत्युक्तंतदनुपपन्नं प्रातिस्विकशुभाशुभकर्मवशेनस्वर्गनरकादिग
तानांमनुष्याणांपुत्रादिभिर्दत्तैरन्नपानादिभिस्तृप्त्यसंभवात् २६४ २६५ २६६ २६७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

संभवेपिस्वयमात्मनाप्यनीशाः कथंस्वर्गादिफलंप्रयच्छंतीत्यतआह नत्यत्रदेवदत्तादयएवश्राद्धकर्मणिसंप्रदानभूताः पित्रादिशब्दैरुच्यंते किंत्वधिष्ठातृवस्वादिदेवतासहिताएव यथादेवदत्तादिशब्दैर्नशरीरमात्रंनाप्यात्ममात्रंकिंतुशरीरविशिष्टआत्मानउच्यंते एवमधिष्ठातृदेवता सहिताएवदेवदत्तादयः पित्रादिशब्दैरुच्यंते अतश्चाधिष्ठातृदेवतावस्वादयः पुत्रादिभिर्दत्तेनान्नपानादिनातृप्ताः संतस्तानपिदेवदत्तादीं स्तर्पयंति कर्तृश्चपुत्रादीन्फलेनसंयोजयंति यथामातागर्भपोषणायान्यदत्तेनदोहदान्नपानादिनास्वयमुपभुक्तेनतृप्तासतीस्वजठरग तमप्यपत्यंतर्पयति दोहदान्नादिप्रदायिनश्चप्रत्युपकारफलेनसंयोजयति तद्वद्वसवोरुद्राअदितिसुताः आदित्याएतेपितरः पितृपितामह

वसुरुद्रादितिसुताः पितरः श्राद्धदेवताः प्रीणयंतिमनुष्याणांपितॄन्श्राद्धेनतर्पिताः २६८
आयुः प्रजांधनंविद्यांस्वर्गंमोक्षंसुखानिच प्रयच्छंतितथाराज्यंप्रीतानॄणांपितामहाः २६९

हप्रपितामहशब्दवाच्याः नकेवलंदेवदत्तादयएवश्राद्धदेवताः श्राद्धकर्मणिसंप्रदानभूताः किंतुमनुष्याणांपितॄन्देवदत्तादीन्स्वयंश्रा द्धेनतर्पितास्तर्पयंति ज्ञानशक्त्यतिशययोगेन किंचनकेवलंपितॄंस्तर्पयंति अपितुश्राद्धकारिण्यः आयुः प्रजांधनंविद्यास्वर्गंमोक्षंसुखा निच प्रयच्छंतितथाराज्यंप्रीतानॄणांपितामहाः चकारात्तत्रतत्रशास्त्रोक्तमन्यदपिफलंस्वयंप्रीताः पितामहावस्वादयः प्रयच्छंतीति इतिश्रा द्धप्रकरणं २६८ २६९ दृष्टादृष्टफलसाधनानिकर्माण्यभिहितान्यप्यभिधास्यंतेचतेषांस्वरूपनिष्पत्तिः फलसाधनत्वंचाविघ्नेनभव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नीत्यविघ्नार्थंकर्मविधास्यन्नविघ्नस्यकारकज्ञापकहेतूनाह विनायकः कर्मविघ्नसिद्ध्यर्थमित्यादिनोभयविधहेतुपरिज्ञानाद्विघ्नस्यप्रागभावपरिपालनायोपस्थितस्यप्रध्वंसायवाप्रेक्षापूर्वकारिणः प्रवर्तंते लोकस्येवोभयविधहेतुपरिज्ञानात् विनायकोविघ्नेश्वरः पुरुषार्थसाधनानांकर्मणांविघ्नसिद्ध्यर्थंस्वरूपफलसाधनत्वविघातसिद्ध्येविनियोजितः नियुक्तः रुद्रेणब्रह्मणाचकाराद्विष्णुनाच गणानांपुष्पदंतप्रभृतीनामाधिपत्येस्वाम्येच २७० एवंविघ्नस्यकारकहेतुमुक्त्वाज्ञापकहेतुप्रदर्शनार्थमाह तेनविनायकेनोपसृष्टोगृहीतोयस्तस्यलक्षणानिज्ञा

विनायकः कर्मविघ्नसिद्ध्यर्थंविनियोजितः गणानामाधिपत्येचरुद्रेणब्रह्मणातथा २७० तेनोपसृष्टोय
स्तस्यलक्षणानिनिबोधत स्वप्नेवगाहतेत्यर्थंजलंमुंडांश्चपश्यति २७१ काषायवाससश्चैवकृष्णान्गृध्रांश्चाधिरो
हति अंत्यजैर्गर्दभैरुष्ट्रैः सहैकत्रावतिष्ठते २७२

पकानिनिबोधतजानीध्वं हेमुनयः पुनर्मुनीनांप्रत्यवमर्शः शांतिप्रकरणप्रारंभार्थः स्वप्नेस्वप्नावस्थायांजलमत्यर्थमवगाहतेस्रोतसाह्रियतेनिमज्जतिवा मुंडितशिरसःपुरुषान्पश्यति काषायवाससोरक्तनीलादिवस्त्रप्रावरणांश्चकृष्णादानाममांसाशिनः पक्षिणोगृध्रादीन्मृगांश्चव्याघ्रादीन् अधिरोहति तथांत्यजैश्चांडालादिभिः गर्दभैःखरैरुष्ट्रैःक्रमेलकैः सहपरिवृत्तस्तिष्ठति व्रजन्नाच्छन्नात्मानंपरैः शत्रुभिः पृष्ठतोधावद्भिरनुगतमभिभूयमानंआत्मानमन्यते २७१ २७२ एवंस्वप्नदर्शनान्युक्त्वाप्रत्यक्षलिंगान्याह विमनाविक्षिप्तचित्तः विफलारंभः विफलाआरंभायस्यसतथोक्तः नकृच्चित्फलमाप्नोति संसीदत्यनिमित्ततः वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नाकारणेन दीनमनस्कोभवति राजनंदनो राजकुलेजातः श्रुतशौर्यधैर्यादिगुणयुक्तोपि राज्यंनलभते कुमारीरूपलक्षणाभिजनादिसं पन्नापीप्सितंभर्तारं अंगनागर्भिण्यपत्यं ऋतुमतीगर्भं अध्ययनतदर्थज्ञानेसत्यपि आचार्यत्वंश्रोत्रियः विनयाचारयुक्तोपि शिष्योध्ययनं श्रवणंवानलभतेइतिसर्वत्रसंबध्यते वणिक्वाणिज्योपजीवी तत्रकुशलोपिधान्यादिक्रयविक्रयादिषुलाभं कृषीवलः कर्षकः तत्राभियु क्तोपिकृषिफलंनाप्नोति एवंयोयावृत्याजीवतिसतत्रनिष्फलारंभश्चेत्तेनोपसृष्टोवेदितव्यः २७३ २७४ २७५ एवंकारकज्ञापकहे

व्रजन्नपितथात्मानंमन्यतेनुमतंपरैः विमनाविफलारंभः संभीदृत्यनिमित्ततः २७३ तेनोपसृष्टोलभतेनरा ज्यंराजनंदनः कुमारीचनभर्तारमपत्यंगर्भमंगना २७४ आचार्यत्वंश्रोत्रियश्चनशिष्योध्ययनंतथा वणिग्लाभंनचाप्नोतिकृषिंचापिकृषीवलः २७५ स्नपनंतस्यकर्तव्यंपुण्येन्हिविधिपूर्वकम् गौरसर्षपकल्केनसाज्येनोत्सा दितस्यच २७६ सर्वौषधैः सर्वगंधैर्बिलिप्तशिरसस्तथा भद्रासनोपविष्टस्यस्वस्तिवाच्याद्विजाःशुभाः २७७

तूनभिधायविघ्नोपशांत्यर्थंकर्मविधातुमाह तस्यविनायकोपसृष्टस्यानागतविनायकोपसर्गपरिहारार्थिनोवास्नपनमभिषेचनंकर्त व्यं पुण्येस्वानुकूलनक्षत्रादियुक्तेन्हिदिवसेनरात्रौविधिपूर्वकं शास्त्रोक्तेनिकर्तव्यतासहितं स्नपनविधिमाह गौरसर्षपकल्केनसिद्धा र्थपिष्टेनसाज्येनघृतलोलीकृतेनोत्सादितस्योद्वर्तितांगस्य तथासर्वौषधैः प्रियंगुनागकेसरादिभिः सर्वगंधैश्चंदनागरुकस्तूरिकादि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

भिर्विलिप्तशिरसोवस्यमाणभद्रासनोपविष्टस्यद्विजाब्राह्मणाःशुभाः श्रुताध्ययनवृत्तसंपन्नाः शोभनाऋतयश्चत्वारोस्यस्वस्तिभवंतोब्रुवं-
स्तिवाच्याः अस्मिन्समयेगृह्योक्तमार्गेणपुण्याहवाचनंकुर्योदित्यर्थः २७६।२७७किंचअश्वस्थानगजस्थानवल्मीकसरित्संगमाशोष्यद्
देश्यआहृतांपंचविधांमृदंगोरोचनांगंधान्चंदनकुंकुमागरुप्रभृतीन्गुग्गुलुंचतास्वप्सुविनिक्षिपेत् याआपःआहृताएकवर्णैःसमानव
र्णैश्चतुर्भिः कुंभैःशुभैरव्रणास्फुटिताकालकेर्ह्रदादशोष्यात्संगमाद्वा ततश्चानडुहेचर्मणिरक्तेलोहितवर्णेउत्तरलोमनिप्राचीनग्रीवेभद्रं
मनोरममासनंश्रीपर्णीनिर्मितस्थाप्यं ततउक्तोदकमृत्तिकागंधादिसहितांश्चूतादिपल्लवोपशोभितान् नानास्त्रग्दामवेष्टितकंठान्चंदनच

अश्वस्थानाद्व्रजस्थानाद्वल्मीकात्संगमाद्ध्रदात् मृत्तिकांरोचनांगंधान्गुग्गुलुंचाप्सुनिक्षिपेत्
२७८ याआहृतास्त्येकवर्णैश्चतुर्भिःकलशैर्ह्रदात् चर्मण्यानडुहेरक्तेस्थाप्यंभद्रासनंततः २७९

र्चितान् नवाहृतवस्त्रविभूषितान् चतसृषुपूर्वादिदिक्षुस्थापयित्वाशुचौविलिप्तेस्थंडिलेरचितपंचवर्णस्वस्तिकेलोहितमानडुहंचर्मोत्त
रलोमप्राचीनग्रीवमास्तीर्यतस्योपरिश्वेतवस्त्रप्रच्छादितमासनस्थापयेदित्येतद्भद्रासनमेतस्मिन्नुपविष्टस्यस्वस्तिवाच्याः द्विजाः २७८
२७९ किंच स्वस्तिवाचनानंतरंजीवत्पतिपुत्राभिः रूपगुणशालिनीभिः सुवेषाभिः कृतमंगलपूर्वादिग्देशस्थितकलशमादायानेनमं
त्रेणाभिषिंचेद्गुरुः सहस्राक्षमनेकशक्तिकंशतधारंबहुप्रवाहमृषिभिर्मन्यादिभिर्यदुदकंपावनंपवित्रं कृतंउत्पादितंतेनोदकेनत्वांवि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नायकोपसृष्टं विनायकोपसर्गशांतये अभिषिंचामि पावमान्यश्चैता आपस्त्वां पुनंतु तदनंतरं दक्षिणदेशावस्थितं हूनीयं कलशमादाया नेनमंत्रेणाभिषिंचेत् २८० भगंकल्याणंतेतुभ्यंवरुणोवरुणोराजाभगंसूर्योभगबृहस्पतिः भगमिंद्रश्चवायुश्चभगंसप्तर्षयश्चददुरिति ततस्तृतीयंकलशमादायानेनमंत्रेणाभिषिंचेत् २८१ तेतवकेशेषुदौर्भाग्यंअकल्याणंसीमंतेमूर्द्धनिचललाटेकर्णयोरक्ष्णोश्चतत्सर्वमापोदेव्योग्नंतुउपशमयंतुसर्वदा ततश्चतुर्थंकलशमादायपूर्वोक्तैरस्त्रिभिर्मंत्रैरभिषिंचेत् सर्वैर्मंत्रैश्चतुर्थमितिमंत्रलिंगात् २८२

सहस्राक्षंशतधारमृषिभिः पावनंकृतम् तेनत्वाभिषिंचामिपावमान्यः पुनंतुते २८० भगंतेवरुणोराजाभगसूर्योबृहस्पतिः भगमिंद्रश्चवायुश्चभगसप्तर्षयोददुः २८१ यत्तेकेशेषुदौर्भाग्यंसीमंतेयच्चमूर्धनि ललाटेकर्णयोरक्ष्णोरापस्तद्धंतुसर्वदा २८२ स्नानस्यसार्षपंतैलंस्रुवेणोदुंबरेणतु जुहुयान्मूर्धनिकुशान्सव्येनपरिगृह्यतु २८३

उक्तेनप्रकारेणकृताभिषेकस्यमूर्धनिसव्यपाणिगृहीतकुशांतर्हितेसार्षपंतैलमुदुंबरवृक्षोद्भवेनस्रुवेणवक्ष्यमाणैर्मंत्रैर्जुहुयादाचार्यः २८३ मितसंमितादिभिर्विनायकस्यनामभिः स्वाहाकारांतैः प्रणवादिभिर्जुहुयादितिगतेनसंबंधः स्वाहाकारयोगाच्चतुर्थीविभक्तिः अतश्च ओंमिताय स्वाहा ओंसंमिताय स्वाहा ओंशालाय स्वाहा ॐ कटंकटाय स्वाहा ओंकूष्मांडाय स्वाहा ॐ राजपुत्राय स्वाहेति षड्मंत्राभवंति अनंतरं लौकिकेग्नौस्थालीपाकविधिनाचरुंश्रपयित्वाएतैरेवषड्भिर्मंत्रैस्तस्मि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न्नेवाग्नोहुत्वातच्छेषंबलिमंत्रैरिंद्राग्नियमनिर्ऋतिवरुणवायुसोमेशानब्रह्मानंतानांनामभिश्चतुर्थ्यंतैर्नमोन्वितैस्तेभ्योबलिंदद्यात् अनंत
रंकिंकुर्यादित्याह कृताकृतायुपहारद्रव्यजातंविनायकस्योपादृत्यसन्निधानात्तज्जनन्याश्चशिरसाभूमिंगत्वा तत्सुरुषायविद्महेवक्रतुंडाय
धीमहि तन्नोदंतीप्रचोदयात्इत्यनेनमंत्रेणविनायकं सुभगायैविद्महेकाममालिन्यैधीमहि तन्नोगौरीप्रचोदयात्इत्यनेनांबिकांचनमस्कु

मितश्चसंमितश्चैवतथाशालकटंकटौ कूश्मांडोराजपुत्रश्चेत्यंतेस्वाहासमन्वितैः २८४ नामभिर्बलिमंत्रैं
श्चनमस्कारसमन्वितैः दद्याच्चतुष्पथेशूर्पेकुशानास्तीर्यसर्वतः २८५ कृताकृतास्तंदुलाश्चपललौदनमेवच
मूत्स्यान्पक्वांस्तथैवामान्मांसमेतावदेवतु २८६ पुष्पचित्रसुगंधंचसुरांचविविधामपि मूलकपूरिकापूपंतथै
वोंडेरकस्वजः २८७ दध्यन्नंपायसंचैवगुडपिष्टंसमोदकम् एतान्सर्वान्समाहृत्यभूमौकृत्वाततः शिरः २८८
विनायकस्यजननीमुपतिष्ठेत्ततोंबिकाम् दूर्वासर्षपपुष्पाणिगृहीत्वार्घ्यंपूर्णमंजलिम् २८९

र्यात् ततउपहारशेषमास्तीर्णकुशेशूर्पेनिधायचतुष्पथेनिदध्यात् बलिंगृण्हंलिमेदेवाआदित्यावसवस्तथा मरुतश्चाश्विनौरुद्राः सुपर्णः
पन्नगाग्रहाः असुरायातुधानाश्चपिशाचोरगमातरः शाकिन्योयक्षवेतालायोगिन्यः पूतनाः शिवाः जृंभकाःसिद्धगंधर्वामायाविद्याधरानशः
दिक्पालालोकपालाश्चयेचविघ्नविनायकाः जगतांशांतिकर्तारोब्रह्माद्याश्चमहर्षयः माविघ्नंभाचमेपापंमासंतुपरिपंथिनः सौम्याभवंतु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तृप्ताश्चभूतप्रेताः सुरयावह्राः इत्येतैर्मंत्रैः कृताकृताः सकृदवहतास्तंडुलाः पललंतिलपिष्टंतन्मिश्रओदनः पललौदनः मत्स्याः पक्वाअपक्वाश्चमांस मेतावदेवच पक्वमपक्वंच पुष्पंचित्ररक्तपीतादिनानावर्णं चंदनादिसुगंधिद्रव्यं सुरात्रिविधा गौडीमाध्वीपैष्टीच मूलकंमूलककंदाकारोमल्यविशेषः पूपिकाप्रसिद्धा अपूपः स्नेहपक्वोगोधूमविकारः उंडेरकस्त्रजः उंडेरकाः पिष्टादिमय्यः ताःप्रोताः स्त्रजः दध्यन्नंदधिमिश्रमन्नं पायसंगुडपिष्टंगुडमिश्रंशाल्यादिपिष्टं मोदकालड्डुकाः अनंतरंविनायकंतज्जननीमंबाअंबिकांवक्ष्यमाणमंत्रेणोपतिष्ठेत् किंकृत्वेत्याह सकुसुमोदकेनार्घ्यंदत्वादूर्वासर्षपपुष्पाणांपूर्णमंजलिंदत्वोपतिष्ठेदितिगतेनान्वयः २८४ २८५ २८६ २८७ २८८ २८९ उपस्थानमंत्रमा

रूपंदेहियशोदेहिभगंभवतिदेहिमे पुत्रान्देहिधनंदेहिसर्वकामांश्चदेहिमे २९० ततः शुक्लां
बरधरः शुक्लमाल्यानुलेपनः ब्राह्मणान्भोजयेद्दद्याद्वस्त्रयुग्मगुरोरपि २९१

ह्विनायकोपस्थानेभगवन्नित्यू-
हः ततोभिषेकानंतरंयजमानः शुक्लांबरधरः शुक्लमाल्यानुलेपनोब्राह्मणान्भोजयेत् यथाशक्तिगुरवेश्रुताध्ययनवृत्तसंपन्नायविनायकस्नपनविधिज्ञायवस्त्रयुग्मंदद्यात् अपिशब्दाद्यथाशक्तिदक्षिणांविनायकोद्देशेनब्राह्मणेभ्यश्च तत्रायंप्रयोगक्रमः चतुर्भिर्ब्राह्मणैः सार्धमुत्कलक्षणोगुरुर्मंत्रज्ञोभद्रासनरचनानंतरंतत्समीपेविनायकंतज्जननींचोक्तमंत्राभ्यांगंधपुष्पादिभिः समभ्यर्च्यचरुंश्रपयित्वाभद्रासनोपविष्टस्ययजमानस्यपुण्याहवाचनंकृत्वाचतुर्भिः कलशैरभिषिच्यसार्षपंतैलंशिरसिहुत्वाचरुहोमंविधायाभिषेकशालायांचतुर्दिक्षुइंद्रादिलो

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

कपालेभ्योबलिंदद्यात् यजमानस्तुस्नानानंतरंशुक्लमाल्यांबरधरोगुरुणासहितोविनायकांबिकाभ्यामुपहारंदत्वाशिरसाभूमिंगत्वाकुसुमोदके
नार्घ्यंदत्वादूर्वासर्षपपुष्पांजलिंचदत्वाविनायकमंबिकांचोपतिष्ठेत् गुरूपहारशेषंशूर्पेकृत्वाशिरसाभूमिंगत्वाचत्वरेनिदध्यात् अनंतरं
वस्त्रयुग्मंदक्षिणांब्राह्मणभोजनंचदद्यादिति इतिविनायककल्पनविधिः २९० २९१ अस्यैवविनायककल्पनस्योपसंहारेणसं
योगांतरंदर्शयितुमाह एवमुक्तेनप्रकारेणविनायकंसंपूज्यकर्मणांफलमविघ्नेनाप्नोतीत्युक्तोपसंहारः संयोगांतरमाह श्रियंचोत्कृष्टनामा
प्नोतीति श्रीकामश्चानेनैवविधानेनविनायकंपूजयेदित्यर्थः आदित्यादिग्रहपीडाशांतिकामस्यलक्ष्म्यादिकामस्यचग्रहपूजादिकल्पंविधास्य

एवंविनायकंपूज्यग्रहांश्चैवविधानतः कर्मणांफलमाप्नोतिश्रियंचाप्नोत्यनुत्तमाम् २९२
आदित्यस्यसदापूजांतिलकस्वामिनस्तथा महागणपतेश्चैवकुर्वन्सिद्धिमवाप्नुयात् २९३

न्ग्रहपूजामुपक्षिपति ग्रहांश्चैवविधानतइति ग्रहानादित्यादीन्वक्ष्यमाणेनविधिनासंपूज्यकर्मणांसिद्धिमाप्नोतिश्रियंचाप्नोति २९२ नि
त्यकाम्यसंयोगानाह आदित्यस्यभगवतः सदाप्रतिदिवसंरक्तचंदनकुंकुमकुसुमादिभिः पूजांकुर्वन् स्कंदस्यमहागणपतेश्चनित्यपूजांकुर्वन्
सिद्धिंमोक्षमात्मज्ञानद्वारेणप्राप्नोतीतिनित्यसंयोगः आदित्यस्कंदमहागणपतीनामन्यतमस्यसर्वेषांवातिलकंस्वर्णादिनिर्मितंरूप्यनिर्मि
तंवाकुर्वन्सिद्धिमभिलषितामाप्नोति तथाचक्षुषीचेतिकाम्यसंयोगः इतिमहागणपतिकल्पः २९३ ग्रहांश्चैवविधानतः कर्मणांफलमाप्नो-

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तिश्रियंचाप्नोत्यनुत्तमामित्यनेनग्रहपूजायाः कर्मणामविघ्नेनफलसिद्धिः श्रीश्चफलमित्युक्तमिदानींफलांतरंण्याह श्रीकामइतिपूर्वोक्तस्यानुवादः शांतिकामआपदुपशांतिकामः सस्यादिवृद्ध्यर्थंप्रवर्षणंतुष्टिः आयुरपमृत्युजयेनदीर्घकालजीवनं पुष्टिरनवद्यशरीरत्वं एताः कामयतइतिवृक्षायुः पुष्टिकामः एतेश्रीकामादयोग्रहयज्ञंग्रहपूजांसमाचरेयुः तथाभिचरन्नपि अदृष्टोपायेनपरपीडाअभिचारः तत्कामश्च ग्रहयज्ञंसमाचरेत् २९४ ग्रहानाह एतेसूर्यादयोनवग्रहाः २९५ ग्रहाःपूज्याइत्युक्तंकिंकृत्वेत्याह सूर्यादीनांमूर्तयस्ताम्रादिभिर्यथाक्रमं-

श्रीकामःशांतिकामोवाग्रहयज्ञंसमाचरेत् वृक्षायुःपुष्टिकामोवातथैवाभिचरन्नपि २९४ सूर्यःसोमो महीपुत्रःसोमपुत्रोबृहस्पतिः शुक्रःशनैश्चरोराहुःकेतुश्चेतिग्रहाःस्मृताः २९५ ताम्रकात्स्फाटिकाद्रक्तचंदनात्स्वर्णकाद्रुभौ राजतादयसःसीसात्कास्यात्कार्याग्रहाःक्रमात् २९६

कार्याः तदलाभेस्ववर्णैर्वर्णकैःपटेलेख्याः मंडलकेषुवा गंधैःरक्तचंदनादिभिर्यथावर्णंनलेख्याइत्यन्वयः द्विभुजत्वादिविशेषस्तुमत्स्यपुराणोक्तोद्रष्टव्यः यथा पद्मासनः पद्मकरः पद्मगर्भसमद्युतिः सप्ताश्वरथसंस्थश्चद्विभुजःस्यात्सदारविः श्वेतः श्वेतांबरधरोदशाश्वः श्वेतभूषणः गदापाणिर्द्विबाहुश्चकर्तव्यो वरदःशशी रक्तमाल्यांबरधरः शक्तिशूलगदाधरः चतुर्भुजोमेषगमोवरदःस्याद्गरासुतः पीतमाल्यांबरधरः कर्णिकारसमद्युतिः खड्गचर्मगदापाणिः सिंहस्थोवरदोबुधः देवदैत्यगुरूतद्वत्पीतश्वेतोचतुर्भुजौ दंडिनौवरदौकार्यौसाक्षसूत्रकमंडलू इंद्रनीलद्युतिःशू

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लीवरदोगृध्रवाहनः बाणबाणासनधरः कर्तव्योर्कसुतःसदा कपालवदनःखड्गचर्मशूलीवरप्रदः नीलःसिंहासनस्थश्चराहुरत्रप्रशस्यते
धूम्रादिबाहवः सर्वेगदिनोविकृताननाः गृध्रासनगतानित्यंकेतवःस्युर्वरप्रदाः सर्वेकिरीटिनःकार्याग्रहालोकहितावहाः स्वांगुलेनोच्छ्रिताः
सर्वेशतमष्टोत्तरंसदेति एतेषांस्थापनदेशश्चतत्रैवोक्तः मध्येतुभास्करंविद्याल्लोहितंदक्षिणेनतु उत्तरेणगुरुंविद्याद्बुधंपूर्वोत्तरेणतु पूर्वेण
भार्गवंविद्यात्सोमंदक्षिणपूर्वके पश्चिमेनशनिंविद्याद्राहुंपश्चिमदक्षिणे पश्चिमोत्तरतः केतुंस्थाप्यावैशुक्लतंडुलैरिति पूजाविधिमाह यथा

स्ववर्णैर्वापटेलेख्यागंधैर्मंडलकेषुवा यथावर्णंप्रदेयानिवासांसिकुसुमानिच २९७ गंधाश्चबलयश्चैवधूपोदेय
श्चगुग्गुलुः कर्तव्यामंत्रवृत्तश्चचरवःप्रतिदैवतम् २९८ आकृष्णेनइमंदेवाअग्निमूर्द्धादिवःककुत् उद्बुध्यस्वेतिच
ऋचोयथासरव्यंप्रकीर्तिताः २९९ बृहस्पतेअतियदर्यस्तथैवानात्सरिश्रुतः शन्नोदेवीस्तथाकांडात्केतुंकृण्वन्नि
मांस्तथा ३००

वर्णेयस्यग्रहस्ययोवर्णः तद्वर्णानिवस्त्रमंधपुष्पाणिदेयानि बलयश्च धूपश्चसर्वेभ्योगुग्गुलुर्देयः चरवश्चप्र
तिदैवतं अग्निप्रतिष्ठापनान्वाधानादिपूर्वकं चतुरश्चतुरोमुष्टीन्निर्वपत्यमुष्मैत्वाजुष्टंनिर्वपामीत्यादिविधिनाकार्याः अनंतरंसमिद्धेग्ना-
विध्याधानाद्याधारांतंकर्मकृत्वाआदित्याद्युद्देशेनयथाक्रमंवक्ष्यमाणमंत्रैर्वक्ष्यमाणाः समिधोवक्ष्यमाणप्रकारेणहुत्वाचरवोहोतव्याः २९६
२९७ २९८ मंत्रानाह आकृष्णेनरजसावर्तमान इत्यादयोनवमंत्राः यथाक्रममादित्यादीनांवेदितव्याः २९९ ३०० ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींसमिधआह अर्कपलाशाद्योयथाक्रमंसूर्यादीनांसमिधोभवंति ताश्चसार्द्राअभग्नाः सत्वचः प्रादेशमात्राः कर्तव्याः ३०१ किं च आदित्यादीनामेकैकस्याष्टशतसंख्याअष्टाविंशतिसंख्यावायथासंभवं मधुनासर्पिषादध्नाक्षीरेणवायुताअक्ताः अर्कादिसमिधोहोतव्याः ३०२ इदानींभोजनान्याह गुडमिश्रओदनोगुडौदनः पायसंहविष्यंमुन्यन्नादि क्षीरषाष्टिकंक्षीरमिश्रः षाष्टिकौदनः दध्नामिश्रओदनोदध्योदनः हविर्घृतौदनः चूर्णतिलचूर्णमिश्रओदनः मांसभक्ष्यमांसमिश्रओदनः चित्रौदनः नानावर्णौदनः एतानिगुडौदनादीनियथाक्रममादि

अर्कः पलाशः खदिरअपामार्गोथपिप्पलः औदुंबरः शमीदूर्वाकुशाश्चसमिधः क्रमात् ३०१ एकैकस्यत्वष्टशत मष्टाविंशतिरेवच होतव्यामधुसर्पिभ्यांदध्नाक्षीरेणवायुताः ३०२ गुडौदनंपायसंचहविष्यंक्षीरषाष्टिकं दध्योद नंहविश्चूर्णमांसंचित्रान्नमेवच ३०३ दद्याद्ब्रह्मक्रमादेवद्विजेभ्योभोजनंद्विजः शक्तितोवायथालाभंसत्कृत्यविधि पूर्वकम् ३०४ धेनुः शंखस्तथानड्वान्हेमवासोहयः क्रमात् कृष्णागौरायसच्छागएतावद्दक्षिणाः स्मृताः ३०५

त्यादुद्देशेनभोजनार्थंद्विजेभ्योब्राह्मणेभ्योदद्यात् ब्राह्मणसंख्यायथाविभवंद्रष्टव्या गुडौदनाद्यभावेतुयथालाभमोदनादिपादप्रक्षालनादि विधिपूर्वकंसत्कृत्यसंमानपुरःसरंदद्यात् ३०३ ३०४ दक्षिणामाह धेनुःदोग्ध्री शंखः प्रसिद्धः अनड्वान्सारसहोबलीवर्दः हेमसुवर्णं वासः पीतं हयः पांडुरः कृष्णागौः आयसंशस्त्रादि छागःप्रसिद्धः एताधेन्वादयोयथाक्रममादित्यादुद्देशेनब्राह्मणानांदक्षिणाःस्मृताः उक्तामन्वा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दिभिः एतच्चसंभवेसति असंभवेतुयथालाभंशक्तितोन्यदेवयत्किंचिद्देयं ३०५ शांतिकामनाविशेषेणसर्वेग्रहाः पूजयितव्याइत्युक्तंतत्रवि
शेषमाह यस्यपुरुषस्ययोग्रहोयदादुष्टोष्टमादिस्थानस्थितःसतंग्रहंतदायत्नेनविशेषेणपूजयेत् यस्मादेषांग्रहाणांब्रह्मणापूर्ववरोदत्तः पूजिताः
संतोऽयमिष्टप्रापणेनानिष्टनिरसनेनचपूजयितारंपूजयिष्यथेति अविशेषेणहिजानधिकृत्यशांतिकपौष्टिकादीनिकर्माण्युक्तानितत्राभि
षेकयुक्तस्यराज्ञोविशेषेणाधिकारइति ३०६ नरेंद्राणामभिषिक्तक्षत्रियाणांग्रहाः पूज्यतमाः अथचान्येषामपिपूज्याइतिगम्यते उभयत्रकार
णमाह प्राणिनामभ्युदयविनिपाताःग्रहाधीनाःयस्मात्तदधिकारिभिःपूज्याः किंच जगतश्चस्थावरजंगमात्मकस्यभावाभावावुत्पत्तिनिरोधौग्रं

यश्चयस्ययदातुष्टःसतंयत्नेनपूजयेत् ब्रह्मणैषांवरोदत्तः पूजिताःपूजयिष्यथ ३०६ ग्रहाधीनानरेंद्राणासुच्छ्रायाः
पतनानिच भावाभावौचजगतस्तस्मात्पूज्यतमाग्रहाः ३०७

हाधीनौतत्रयद्येतेपूजिताः तदास्वकालएवोत्पत्तिनिरोधौभव
तोनान्यथा उत्पत्तिसमयेनोत्पादोकालेनिरोधश्च जगदीश्वरत्वाच्चनरेंद्राणांतद्योगक्षेमकारिणांपूज्यतमाग्रहाइतितेषांविशेषेणशांतिकादिष्व
धिकारः तथाचगौतमेन राजासर्वस्येष्टेब्राह्मणवर्जमिति राजानमधिकृत्यवर्णानाश्रमांश्चन्यायतोभिरक्षेच्चततश्चैतान्स्वधर्मेस्थापये
दित्यादीन्कांश्चिद्धर्मानुक्त्वायानिचदैवोत्पातचिंतकाः प्रब्रूयुस्तान्यद्रियेतनदधीनमपित्वेकेयोगक्षेमंप्रतिजानतेइति शांतिकपौष्टिकाद्यनुष्ठा
नहेतुमभिधायशांतिकपुण्याहस्वस्त्ययनायुष्यमंगलसंयुक्तान्याभ्युदयिकानिविद्वेषिणःस्तंभनाभिचारद्विषद्धृद्युक्तानिचशालाग्नौकुर्यादिति

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शांतिकादीनिदर्शितानि इतिग्रहशांतिप्रकरणं ३०७ साधारणान्गृहस्थधर्मानुक्त्वेदानींराज्याभिषेकादिगुणयुक्तस्यगृहस्थस्यविशेषधर्मानाह पुरुषार्थसाधनकर्मारंभाध्यवसायउत्साहः महानुत्साहोयस्यासौमहोत्साहः बहुवेदार्थदर्शीस्थूललक्षः परकृतोपकारापकारौनविस्मरतीतिकृतज्ञः तपोज्ञानादिवृद्धानांसेवकः विनयेनयुक्तोविनीतः विनयशब्देनाविरुद्धः पूर्वोक्तस्नातकधर्मकलापउच्यते नसंशयंप्रपद्येतनाकस्मादप्रियंवदेदित्यादिनोक्तः सत्वसंपन्नः संपदापदोर्हर्षविषादरहितः मातृतः पितृतश्चाभिजनवान्कुलीनः सत्यवाक्सत्यवचनशीलः शु

महोत्साहःस्थूललक्षःकृतज्ञोवृद्धसेवकः विनीतःसत्वसंपन्नःकुलीनःसत्यवाक्शुचिः ३०८ अदीर्घसूत्रःस्मृतिमानक्षुद्रोपरुषस्तथा धार्मिकोव्यसनश्चैवप्राज्ञः शूरोरहस्यवित् ३०९ स्मरध्रगोस्तान्वीक्षिक्यांदंडनीत्यांतथैवच विनीतस्त्वथवार्तायांत्रय्यांचैवनराधिपः ३१०

चिर्बात्यंतरशौचयुक्तः अवश्यकार्याणांकर्मणामारंभेप्रारब्धानांचसमापनेयोनविलंबतेः सावदीर्घसूत्रः अधिगतार्थाविस्मरणशीलः स्मृतिमान् अक्षुद्रोसद्गुणद्वेषी अपरुषः परदोषाकीर्तनः धार्मिकः वर्णाश्रमधर्मान्वितः नषिद्धंतेव्यसनानियस्यासौअव्यसनः व्यसनानिचाष्टादश यथाह मनुः मृगयाक्षादिवास्वप्नः परिवादः स्त्रियोमदः तौर्यत्रिकंवृथाघातः कामजोदशकोगणः पैशून्यंसाहसंद्रोहईर्ष्यासूयार्थदूषणं वाग्दंडजंचपारुष्यंक्रोधजोपिगणोष्टकइति तत्रचसप्तकष्टतमानि यथाह

ओ॰ २ स्त्रीसेवनंतच्चदिवावेदितव्यं मद्योमदिरादिना नृत्यगीतवादित्राणित्रीणि ओ॰ १ छद्मनावधईर्ष्या परगुणासहिष्णुताअसूयावाक्पारुष्यमाक्रोशादि अनपराधेनताडनादिदंडपारुष्यं

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पानमक्षाः स्त्रियश्चैवमृगयाचयथाक्रमं एतत्कष्टतमंविद्याच्चतुष्कंकामजेगणे दंडस्यपातनंचैववाक्पारुष्यार्थदूषणे क्रोधजेषिगणेविद्या कष्टमेतत्त्रिकंसदेति प्राज्ञोगंभीरार्थावधारणक्षमः शूरोनिर्भयः रहस्यवित्गोपनीयार्थगोपनचतुरः स्वरंध्रगोतास्वस्यसप्तसुराज्यांगेषुय स्वरप्रवेशद्वारशैथिल्यंतत्स्वरंध्रंतस्यगोसाप्रच्छादयिता आन्वीक्षिक्यामात्मविद्यांयांदंडनीत्यामर्थयोगक्षेमोपयोगिन्यांवार्तायांकृषिवाणिज्यप शुपालनरूपायांधनोपचयहेतुभूतायां त्रय्यांऋग्यजुःसाममय्यांचविनीतः तत्तद्भिज्ञैः प्रावीण्यंनीतः यथाहमनुः त्रैविद्येभ्यस्त्रयींविद्यांदंड नीतिंचशाश्वतीं आन्वीक्षिकींचात्मविद्योवार्तारंभांश्चलोकतइति नराधिपोराज्याभिषिक्तःस्यादितिसर्वत्रसंबंधः ३०८ ३०९ ३१० एव

समंत्रिणः प्रकुर्वीतप्राज्ञान्मौलान्स्थिरान्शुचीन् तैःसार्द्धंचिंतयेद्राज्यंविग्रहेणाथततःस्वयम् ३११

मभिषेकयुक्तस्यांतरंगान्धर्मानभिधायेदानींबहिरंगानाह महोत्साहादिगुणैर्युक्तोराजामंत्रिणःकुर्वीत कथंभूतान्प्राज्ञान्हिताहितविवेककु शलान् मौलान्स्ववंशपरंपरायातान् स्थिरान्महत्यपिहर्षविषादस्थानेविकाररहितान् शुचीन्धर्मार्थकाममयोपधाशुद्धान् तैश्चसप्ताष्टौवाका र्याः यथाहमनुः मौलान्शास्त्रविदःशूरान्लब्धलक्षान्कुलोद्भवान् सचिवान्सप्तचाष्टौवाकुर्वीतसुपरीक्षितानिति एवंमंत्रिणःपूर्वंकृत्वातैःसार्धं राज्यंसंधिविग्रहादिलक्षणंकार्यंचिंतयेत् समस्तैर्व्यस्तैश्च अनंतरंतेषामभिप्रायंज्ञात्वासकलशास्त्रार्थविचारकुशलेनब्राह्मणेनपुरोहितेन सहकार्यंविचित्यततःस्वयंबुद्ध्याकार्यंचिंतयेत् ३११ कीदृशंपुरोहितंकुर्यादित्याह पुरोहितंचसर्वेषुदृष्टादृष्टार्थेषुकर्मसुपुरतोहितंदानमा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

न सत्कारेरात्मसंबन्धं कुर्यात् कथंभूतंदैवज्ञंग्रहोत्सातत्तच्छमनादेर्वेदितारं उदितोदितं विद्याभिजनानुष्ठानादिभिरुदितेः शास्त्रोक्तैः उदितं-
समृद्धंदंडनीत्यामर्थशास्त्रेकुशलं अथर्वांगिरसेचशांत्यादिकर्मणि ३१२ श्रौताग्निहोत्रादिस्मार्तोपासनादिक्रियानुष्ठानसिध्यर्थंऋत्विजो
वृणुयात् यज्ञांश्चराजसूयादीन्विधिवद्यथाविधानंभूरिदक्षिणान्बहुदक्षिणानेवकुर्यात् ३१३ किंच ब्राह्मणेभ्योभोगान् सुरवानितत्साधनदा
नद्वारेणदद्यात् वसूनिचसुवर्णरूप्यभूप्रभृतीनिविविधानिनानाप्रकाराणि यस्मादेषराज्ञांअक्षयोनिधिः शेवधिः यद्ब्राह्मणेभ्योदीयते साधा

पुरोहितंप्रकुर्वीतदैवज्ञमुदितोदितम् दंडनीत्यांचकुशलमथर्वांगिरसेतथा ३१२ श्रौतस्मार्तक्रियाहेतोर्वृणुया
देवचर्त्विजः यज्ञांश्चैवप्रकुर्वीतविधिवद्भूरिदक्षिणान् ३१३ भोगांश्चदत्वाविप्रेभ्योवसूनिविविधानिच अक्षयोयं
निधीराज्ञांयद्विप्रेषूपपादितम् ३१४ अस्कन्नमव्ययंचैवप्रायश्चित्तैरदूषितम् अग्नेःसकाशाद्विप्राग्नौहुतश्रेष्ठमि
होच्यते ३१५ अलब्धमीहेद्दर्मेणलब्धंयत्नेनपालयेत् पालितंवर्धयेन्नीत्यावृद्धंपात्रेषुनिक्षिपेत् ३१६

रणधर्मत्वेनदानप्राप्तौस
त्यांराज्ञादानप्राधान्यप्रतिपादनार्थंपुनर्वचनं ३१४ किंच अग्नेः सकाशादग्निसाध्यान्भूरिदक्षिणात् राजसूयादेरपिविप्राग्नौहुतंश्रेष्ठमिहोच्यते-
यतएतदस्कन्नंक्षरणरहितं अव्ययंपशुहिंसारहितं प्रायश्चित्तैरदूषितंप्रायश्चित्तायासरहितं ३१५ वसूनिविप्रेभ्योदद्यादित्युक्त्वापरिपाल्या
दद्यादित्याह अलब्धलाभायधर्मशास्त्रानुसारेणयतेन यत्नेनलब्धंतत्परिपालयेत् स्वयमवेक्षयारक्षेत् पालितंनीत्यावणिक्पथादिक्रयावृद्धिं न

ओ॰१स्वयमेवक्षयाद्रक्षेत्॰

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

येत् वृद्धं च पात्रेषु त्रिविधेषु धर्मार्थकामपात्रेषु निक्षिपेत् दद्यात् ३१६ पात्रे निक्षिप्य किं कुर्यादित्याह यथोक्तविधिना भूमिं दत्वा स्वत्वनिवृत्तिं कृत्वा निबंधं वा एकस्य भांडभरस्येयंतो रूपका एकस्य पर्णभरस्येयंति पर्णानीति वा निबंधं कृत्वा लेख्यं कारयेत् किमर्थमागामिनः एष्यंतो ये भद्राः साधवो नृपतयो भूपास्तेषामनेन दत्तमनेन प्रतिगृहीतमिति परिज्ञानाय पार्थिवो भूपतिः अनेन भूपतेरेव भूमिदाने निबंधदाने वाधिकारो न भोगपतेरिति दर्शितं ३१७ लेख्यं कारयेदित्युक्तं कथं कारयेदित्युक्तं कथं कारयेदित्याह कार्पासिके पटे ताम्रपट्टे फलके वा आत्मनो वंश्यान्प्रपितामहपि

दत्वा भूमिं निबंधं वा कृत्वा लेख्यं तु कारयेत् आगामिभद्रनृपतिपरिज्ञानाय पार्थिवः ३१७ पटे वा ताम्रपट्टे वा स्वमुद्रोपरिचिन्हितम् अभिलेख्यात्मनो वंश्यानात्मानं च महीपतिः ३१८ प्रतिग्रहपरीमाणं दानच्छेदोपवर्णनं स्वहस्तकालसंपन्नं शासनं कारयेत्स्थिरः ३१९

तामहपितॄन् बहुवचनस्यार्थवत्त्वाय वंशवीर्यश्रुतादिगुणोपवर्णनपूर्वकमभिलेख्यात्मानं च शब्दात्प्रतिग्रहीतारं प्रतिग्रहपरिमाणं दानच्छेदोपवर्णनं चाभिलेख्य प्रतिगृह्यत इति प्रतिग्रहो निबंधस्तस्य रूपकादिपरिमाणं दीयते इति दानं क्षेत्रादितस्य छेदः छिद्यते अनेनेति छेदः नद्याद्याघाटादौ निवर्तनं तत्परिमाणं च तस्योपवर्णनं अमुकनद्या दक्षिणतो यं ग्रामः क्षेत्रं वा पूर्वतोमुकग्रामस्यैतावन्निवर्तनमित्यादि निवर्तनपरिमाणं च लेख्यमेव आघाटस्य नदीनगरवर्त्मादेः संचारित्वेन भूमेर्न्यूनाधिकभावसंभवात्तन्निवृत्त्यर्थं स्वहस्तेन स्वहस्तलिखितेन मतं मे अमुकनाम्नः अमुकपुत्रस्य यदत्रोपरि लेखितमित्यनेन संपन्नं युक्तं कालेन च द्वि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

विधेन शकनृपातीतरूपेण संवत्सररूपेण च कालेन चंद्रसूर्योपरागादिना संपन्नं स्वमुद्रया गरुडवाराहादिरूपयोपरि बहिश्चिन्हितं अंकितं -
स्थिरं दृढं शासनं शिष्यंते भविष्यंतो नृपतयः अनेन दानाच्छ्रेयोनुपालनमिति शासनं कारयेत् महीपतिर्न भोगपतिः संधिविग्रहादिकारिणा
न येन केनचित् संधिविग्रहकारी तु भवेद्यस्तस्य लेखकः स्वयं राज्ञा समादिष्टः स लिखेद्राजशासनमिति स्मरणात् दानमात्रेणैव दानफले
सिद्धे शासनकारणं भोगाभिवृद्ध्या फलातिशयार्थम् ३१८ ३१९ इदानीं राज्ञो निवासस्थानमाह रम्यं रमणीयं अशोकचंपकादिभिः प
शव्यं पशुभ्यो हितं पशुवृद्धिकरं आजीव्यमुपजीव्यं कंदमूलपुष्पफलादिभिः जांगलं यद्यप्यल्पोदकतरुपर्वतो देशो जांगलः तथाप्यत्र सजल-

रम्यं पशव्यमाजीव्यं जांगलं देशमावसेत् तत्र दुर्गाणि कुर्वीत जनकोशात्मगुप्तये ३२० तत्र तत्र च निष्णाता
नध्यक्षान्कुशलान्शुचीन् प्रकुर्यादायकर्मांतव्ययकर्मसु चोद्यतान् ३२१

तरुपर्वतो देशो जांगलशब्देनाभिधीयते तं देशमावसे
दधिवसेत् तत्रैवंविधे देशे जनानां कोशस्य सुवर्णादेरात्मनश्च रक्षणार्थं दुर्गं कुर्वीत दुर्गं च षड्विधं यथाह मनुः धन्वदुर्गं महीदुर्गमब्दुर्गं वार्क्ष्यमेव च
नृदुर्गं गिरिदुर्गं च समावृत्यावसेत्पुरमिति ३२० किंच तत्र तत्र धर्मार्थकामादिषु अध्यक्षान् योग्यानधिकारिणः प्रकुर्यान्नियुंजीत यथाहुः धर्मकृ
त्येषु धर्मज्ञानर्थकृत्येषु पंडितान् स्त्रीषु क्लीबान्नियुंजीत नीचान्निंद्येषु कर्मस्विति कीदृशान्निष्णातान् अनन्यव्यापारान् कुशलान् तत्तद्व्यापारचतु

ओं. ३ निरुदकेन पंचयोजनेन देशेन समंततो व्याप्तं धन्वदुर्गं पाषाणेष्टकायुतद्वादशहस्तोत्थितेन बहुविस्तृतेन युद्धार्थमुपरिभ्रमणयोग्येन साधारणगवाक्षादियुक्तेन प्रकारेण समंताद्वेष्टितं सद्वा
रं महीदुर्गं अगाधोदकेन समंततो वेष्टितं अब्दुर्गं वृक्षजन्यं वार्क्ष्यं चतुरंगबलजं नृदुर्गं गिरिणा वेष्टितं गिरिदुर्गं.

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

रान् शुचीन् चतुर्विधोपधाशुद्धान् आयकर्मसु सुवर्णाद्युत्पत्तिस्थानेषु व्ययकर्मसु सुवर्णादिदानस्थानेषु उद्यतान् अनलसान् च शब्दात्प्राज्ञत्वादिगु
णयुक्तान् उक्तं च प्राज्ञत्वमुपधाशुद्धिरप्रमादोभियुक्तता कार्येषु व्यसनाभावः स्वामिभक्तिश्च योग्यतेति ३२१ भोगांश्च दद्याद्विप्रेभ्यो वसूनि विवि
धानि चेति सामान्येन स्वस्य दानमुक्तं इदानीं नृपाणां विक्रमार्जितस्य दाने फलातिशयमाह अस्मादुत्कृष्टतमो धर्मो नृपाणां न विद्यते यद्रणार्जितं द्र
व्यं विप्रेभ्यो दीयते यच्च प्रजाभ्योऽभयदानं ३२२ रणार्जितं देयमित्युक्तं द्रव्यार्जनाय रणे प्रवृत्तस्य विपत्तिरपि संभवतीति न धर्मो नाप्यर्थ इति ततो नि

नातः परतरो धर्मो नृपाणां यद्रणार्जितम् विप्रेभ्यो दीयते द्रव्यं प्रजाभ्यश्चाभयं सदा ३२२ य आहवेषु वध्यंते भूम्यर्थमपरा
ङ्मुखाः अकूटैरायुधैर्यांति ते स्वर्गं योगिनो यथा ३२३ पदानि क्रतुतुल्यानि भग्नेष्वविनिवर्त्तिनाम् राजा सुकृतमादत्ते हता
नां विपलायिनाम् ३२४ तवाहं वादिनं क्लीबं निर्हेतिं परसंगतम् न हन्याद्विनिवृत्तं च युद्धप्रेक्षणकादिकम् ३२५

वृतिरेव श्रेयसीत्यत आह ये भूम्याद्यर्थमाहवेषु प्रवृत्ता अपराङ्मुखा अभिमुखा वध्यंते मार्यंते ते स्वर्गं यांति योगाभ्यासे रता यथा यद्यकूटैरविष
दिग्धादिभिरायुधैर्योद्धारो भवंति ३२३ किंच स्वबलेषु करितुरगरथपदातिषु भग्नेष्वनिवर्तिनां परबलाभिमुखयायिनां पदानि क्रतुतुल्यानि अश्वमे
धतुल्यानि विपर्यये दोषमाह विपलायिनां पराङ्मुखानां हतानां राजा सुकृतमादत्ते ३२४ अपि च तवाहमिति यो वदति तं क्लीबं नपुंसकं निर्हेतिं निरायु
धं परसंगतमन्येन सह युध्यमानं विनिवृत्तं युद्धाद्विनिवृत्तं युद्धप्रेक्षणको युद्धदर्शी तमपि न हन्यादिति सर्वत्र संबंधः आदिग्रहणादश्वसारथ्यादी

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नांग्रहणं यथाहगौतमः नदोषोहिंसायामावहेन्यत्राश्वसारथ्यनायुधकृतांजलिप्रकीर्णकेशपराङ्मुखोपविष्टस्थलवृक्षारूढदूतगोब्राह्मणवादिभ्यइति शंखोप्याह नपानीयंपिबंतंनभुंजाननोपानहौमुंचंतंनावर्माणंसवर्माणंनस्त्रियंनकरेणुंनवाजिनंनसारथिंनदूतंनब्राह्मणंनराजानमराजाहन्यादिति ३२५ कृतरक्षःपुरस्यात्मनश्चरक्षांविधायप्रतिदिनंप्रातःकालउत्थायस्वयमेवायव्ययौपश्येत् ततोव्यवहारान्दृष्ट्वामध्यान्हकालेस्नात्वाकामतोयथाकालंभुंजीत ३२६ तदनंतरंहिरण्यादिकंव्याप्तैर्हिरण्यादानयननियुक्तैरानीतंस्वयमेवनिरीक्ष्यभांडागारेषुनिक्षिपेत् ततश्चारान्विश्वस्तान्प्रत्यागतान्पश्येत् येपरराज्येवृत्तांतपरिज्ञानायपरिव्राजिकतापसादिरूपेणगूढचारिणःप्रेषितास्तांश्चारान्दृष्ट्वाक

कृतरक्षःसमुत्थायपश्येद्दायव्ययौस्वयम् व्यवहारांस्ततोदृष्ट्वास्नात्वाभुंजीतकामतः ३२६ हिरण्यंव्यापृतानीतं भांडागारेषुनिक्षिपेत् पश्येच्चारांस्ततोदूतान्प्रेषयेन्मंत्रिसंगतः ३२७ ततः स्वैरविहारीस्यान्मंत्रिभिर्वासमागतः बलानांदर्शनंकृत्वासेनान्यासहचिंतयेत् ३२८

चिन्निवेशयेत् तदनंतरंदूतांश्चपश्येत् दूताश्चयेप्रकटमेवराजांतरंप्रतिगतागतंमान्वयंति तेचत्रिविधाः निसृष्टार्थाः संदिष्टार्थाः शासनहराश्चेति तत्रनिसृष्टार्थाः राज्ञकार्याणिदेशकालोचितानिस्वयमेवकथयितुंक्षमाः उक्तमात्रंयेपरस्मैनिवेदयंतितेसंदिष्टार्थाः शासनहरास्तुराजलेखहारिणः तान्पूर्वप्रेषितानागतान्मंत्रिसंगतःपश्येत् दृष्ट्वातद्वार्त्तामाकलय्यपुनः प्रेषयेत् ३२७ तदनंतरमपराण्हेस्वैरंयथेष्टमेकोतः पुरविहारीस्यात् मंत्रिभिर्वाविश्वासिभिः कलाकुशलैः परिहासवेद्भिः परिवृतः स्त्रीभिश्चरूपयोव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

नवैदग्ध्यशालिनीभिः भुक्तवान्विहरेच्चैवस्त्रीभिरंतःपुरेसह वित्तत्यत्वयथाकामंपुनःकार्याणिचिंतयेदितिमनुस्मरणात् ततोविशिष्टैर्वस्त्रकुसुमविलेपनालंकारैरलंकृतः हस्त्यश्वरथपदातिबलंदृष्वासेनान्यासेनापतिनासहतद्दर्शनादिदेशकालोचितंचिंतयेत् ३२८ ततःसायंकालेसंध्यामुपास्यसामान्येनप्राप्तस्यापिपुनर्वचनंकार्याकुलत्वादविस्मरणार्थं अनंतरंयेपूर्वदृष्टाः क्वचित्स्थानेनिवेशितास्तेषांचाराणांगूढभाषितमंतर्वेश्मनिशस्त्रपाणिः शृणुयात् उक्तंच संध्यांचोपास्यशृणुयादंतर्वेश्मनिशस्त्रभृत् रहस्याख्यापिनांचैवप्रणिधीनांचचेष्टितमिति ततोनृत्यगीतादिभिः कंचित्कालंक्रीडित्वाकक्षांतरंप्रविश्यभुंजीत गत्वाकक्षांतरंत्वन्यत्समनुज्ञाप्यनंजनं प्रविशेद्भोजनार्थंचस्त्रीभिरंतःपुरं

संध्यामुपास्यशृणुयाच्चाराणांगूढभाषितम् गीतनृत्यैश्चभुंजीतपठेत्स्वाध्यायमेवच ३२९ संविशेत्तूर्यघोषेणप्रतिबुध्येततथैवच शास्त्राणिचिंतयेद्बुध्यासर्वकर्तव्यतास्तथा ३३०

सहेतिस्मरणात् ततोऽविस्मरणार्थंयथाशक्तिस्वाध्यायंपठेत् ३२९ तदनंतरंसूर्यशंखघोषेणसंविशेत्स्वप्यात् तथैवतूर्यादिघोषेणप्रतिबुध्येत् प्रतिबुध्यचशास्त्रविद्भिर्विश्वासिभिः सहएकाकीवापश्चिमेयामेशास्त्राणिचिंतयेत् सर्वकर्तव्यताश्चसर्वकार्याणिच एतच्चस्वस्थंप्रत्युच्यतेअस्वस्थः पुनः सर्वकार्येषुअन्यंनियोजयेत् यथाहमनुः एतद्दंडसमादिष्टोराजापृथिवीपतिः अस्वस्थः सर्वमेवैतन्मंत्रिमुख्येनिवेशयेदिति ३३० अनंतरंतत्रस्थएवविश्वस्तान्स्वान्चारान्दानमानसत्कारैःपूजितान्स्वेषुसामंताद्यधिकारिषुअन्येषुमहीपतिषुप्रेषयेत् तच्चिकीर्षितपरिज्ञानायततःप्रा

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

तः संध्यामुपास्याग्निहोत्रं हुत्वा पुरोहितर्त्विगाचार्यादिभिराशीर्भिरभिनंदितोज्योतिर्विदोदृष्ट्वा तेभ्यश्च ग्रहादिस्थितिं विदित्वा शांतिकादीनि च पुरोहितायादिश्य वैद्याश्च दृष्ट्वा तेभ्यश्च स्वशरीरस्थितिं निवेद्य प्रतिविधानं चादिश्य गांदोग्ध्रीं कांचनं महीं च नैवेशिकानि विवाहोपयोगी निकन्यालंकारादीनि गृहाणि च सुधाधवलितादीनि श्रोत्रियेभ्योधीतवेदेभ्यो ब्राह्मणेभ्योद्यादिति प्रत्येकं संबध्यते ३३१ ३३२ किंच ब्राह्मणेष्वधिक्षिप्तपक्षमोक्षमावान् स्निग्धेषु स्नेहवत्सु मित्रादिषु जिह्मः अवक्रः अरिषु क्रोधनः भृत्यवर्गेषु प्रजासु च हिताचरणेनाहितनिव-

प्रेषयेच्च तनश्चारान्स्वेष्वन्येषु च सादरान् ऋत्विक्पुरोहिताचार्यैराशीर्भिरभिनंदितः ३३१ दृष्ट्वाज्योतिर्विदोवैद्या न्दद्याद्गाकांचनंमहीम् नैवेशिकानिचततःश्रोत्रियेभ्योगृहाणिच ३३२ ब्राह्मणेषुक्षमीस्निग्धेषुजिह्मः क्रोधनोरि षु स्याद्राजाभृत्यवर्गेषु प्रजासुचयथापिता ३३३ पुण्यात्षड्भागमादत्तेन्यायेनपरिपालयन् सर्वदानाधिकंयस्मात् प्रजानांपरिपालनम् ३३४ चौरतस्करदुर्वृत्तमहासाहसिकादिभिः पीड्यमानाःप्रजारक्षकायस्यैश्वविशेषतः ३३५

र्तनेनचपितेवद्यावान्स्यादितिप्रत्येकंसंबध्यते ३३३ प्रजापरिपालनफलमाह यस्मान्न्यायेनशास्त्रोक्तमार्गेणप्रजाः परिपालयन् परिपालि तप्रजोपचितिपुण्यात्षड्भागंषष्ठंभागमादत्ते यस्माच्चसर्वेभ्योभूम्यादिदानेभ्यः प्रजानांपरिपालनमधिकफलं तस्मात्प्रजासुयथापितातथैव स्यादितिगतेनसंबंधः ३३४ चाराःप्रतारकाः विश्वास्यये परधनमपहरंतिप्रच्छन्नापहारिणतस्कराः दुर्वृत्ताः इंद्रजालिककितवादयः सहोब

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

लेसहसाबलेनकृतंसाहसंमहच्चतत्साहसंचमहासाहसंतेनवर्तेतेइतिमहासाहसिकाः प्रसह्यापहारिणः आदिशब्दान्मोलिककुहकप्रभृतयः एतैःपीड्यमानाः बाध्यमानाःप्रजारक्षेत् कायस्थागणकालेखकाश्चतैः पीड्यमानाः विशेषतोरक्षेत् तेषांराजवल्लभतयातिमायावित्वाच्चदुर्निवारत्वात् ३३५ अरक्ष्यमाणाःप्रजाः यत्किंचित्किल्बिषंचौर्यपरदारगमनादिकुर्वंतितत्तस्मात्तापद्धर्नृपतेर्भवति यस्मादसौराजारक्षणार्थंप्रजाभ्यःकरान्गृह्णाति ३३६ राष्ट्रेराज्ञाअधिकारेषुयेनियुक्तास्तेषांविचेष्टितंचरितंचारैरुपलक्षणैःसम्यक्ज्ञात्वासाधून्सुचरितान्-

अरक्ष्यमाणाः कुर्वंतियत्किंचित्किल्बिषंप्रजाः तस्मात्तुनृपतेरर्धंयस्माद्गृह्णात्यसौकरान् ३३६ येराष्ट्राधिकृतास्तेषां चारैर्ज्ञात्वाविचेष्टितम् साधून्समानयेद्राजाविपरीताश्चयातयेत् ३३७ उत्कोचजीविनोद्रव्यहीनान्कृत्वाविवासयेत् सदानमानसत्कारान्श्रोत्रियान्वासयेत्सदा ३३८ अन्यायेननृपोराष्ट्रात्स्वकोशंयोभिवर्धयेत् सोचिराद्भ्रिगतश्रीकोनाशमेतिसबांधवः ३३९ प्रजापीडनसंतापात्समुद्भूतोहुताशनः राज्ञःकुलश्रियंप्राणांश्चादग्धानिवर्तते ३४०

संमानयेत् दानमानसत्कारैःपूजयेत् विपरीतान्दुष्टचरित्रान्सम्यग्विदित्वाघातयेत् अपराधानुसारेण येपुनरुत्कोचजीविनस्तान्द्रव्यरहितान्कृत्वा स्वराष्ट्रात्प्रवासयेत् श्रोत्रियान्सदानमानसत्कारैःसहितान्कृत्वास्वराष्ट्रेस्वदेशेसदैवंवासयेत् ३३७ ३३८ योसौराजास्वराष्ट्रादन्यायेनद्रव्यमादाय स्वकोशंविवर्धयेत्सोचिराच्छीघ्रमेवविगतश्रीकोविनष्टलक्ष्मीकः बंधुभिःसहनाशंप्राप्नोति ३३९ प्रजानांतस्करादिकृतपीडनेनयः संतापस्तस्यादु

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

द्भूतोहुताशन इव संतापकारित्वाद्पुण्यराशिहुताशनशब्देनोच्यते सराज्ञः कुलंश्रियंप्राणांश्चादग्ध्वानाशमनीत्वाननिवर्त्ततेनोपशाम्यति ३४० न्यायतःस्वराष्ट्रपरिपालनेराज्ञोयोधर्मस्तंसकलंवक्ष्यमाणन्यायेनपरराष्ट्रंवशंनयन् आत्मसात्कुर्वन्नाप्नोतिधर्मषड्भागंच ३४१ किंचय दापरदेशोवशमुपागतः तदानस्वदेशाचारादिसंकरः कार्यः यस्मिन्देशेआचारः कुलस्थितिर्व्यवहारोवायथैवप्रागासीन्नथैवासौपरिपालनीयः यदिशास्त्रविरुद्धोनभवति यदावशमुपागतइत्यनेनवशोपगमनात्प्रागनियमइतिदर्शितं यथोक्तं उपरुध्यारिमासीतराष्ट्रंचास्योपपीडयेत् दूष

यएवनृपतेर्धर्मःस्वराष्ट्रपरिपालने तमेवकृत्स्नमाप्नोतिपरराष्ट्रंवशंनयन् ३४१ यस्मिन्देशेयआचारोव्यवहारः कु
लस्थितिः तथैवपरिपाल्योसोयदावशमुपागतः ३४२ मंत्रमूलंयतोराज्यंतस्मान्मंत्रंसुरक्षितम् कुर्याद्यथास्यनविदुः
कर्मणामाफलोदयात् ३४३ अरिमित्रमुदासीनोनंतरस्तत्परः परः क्रमशोमंडलंचिंत्यं सामादिभिरुपक्रमैः ३४४

येचास्यसततंयवसान्नोदकेंधनमिति ३४२ यस्मात्तैः सार्धंचिंतयेद्राज्यमित्याद्युक्तंमंत्रमूलंराज्यंतस्मान्मंत्रंयत्नेनतथासुरक्षितंकुर्यात् य
थास्यराज्ञः कर्मणांसंधिविग्रहादीनामाफलोदयात्फलनिष्पत्तेः प्राग्यावदन्येमंत्रंनजानंति ३४३ किंच अरिःशत्रुःमित्रंसुहृत् उभयविलक्षण
उदासीनश्च तेचत्रयस्त्रिविधाःसहजाः कृत्रिमाः प्राकृताश्चेति तत्रसहजोरिः सापत्नपितृव्यतत्सुत्रादिः कृत्रिमोरिः यस्यापकृतंयेनचापकृतं प्रा
कृतस्त्वनंतरदेशाधिपतिः सहजंमित्रं भागिनेयपितृष्वस्रीयमातृष्वस्रीयादि कृत्रिमंमित्रं येनोपकृतंयस्यचोपकृतं प्राकृतंमित्रमेकांतरितदे

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

शाधिपतिः सहजकृत्रिममित्रशत्रुलक्षणरहितोसहजकृत्रिमोदासीनोप्राकृतोदासीनोह्यंतरितदेशाधिपतिः अस्मिंश्चतुर्विधः यातव्योच्छेत्तव्य
पीडनीयकर्शनीयभेदेन तत्रयातव्योनंतरभूपतिः व्यसनीहीनबलोविरक्तप्रकृतिर्विदुर्गोमित्रहीनोदुर्बलश्चोच्छेत्तव्यः पीडनीयोमित्रबलहीन
नः प्रबलमित्रबलयुक्तः कर्शनीयः निर्मूलनाशमुच्छेदंपीडनंबलनिग्रहं कर्शनंतुपुनःप्राहुः कोशदंडापकर्षणादिति मित्रंद्विविधं बृंहणीयकर्शनी
यमितिकोशबलहीनंबृंहणीयं कोशबलाधिकंकर्शनीयं अनंतरस्तत्परःपरइतिप्राकृतारिमित्रोदासीनानाह अनंतरःप्राकृतोरिः तत्परःप्राकृ
तंमित्रंतस्मात्परःप्राकृतउदासीनः शेषाः पुनःप्रसिद्धत्वान्नोक्ताः एतद्राजमंडलंक्रमशः पूर्वादिक्रमेणचिंत्यं तेषांचेष्टितंज्ञातव्यं ज्ञात्वाचसामा

मि.आ. १

उपायाःसामदानंचभेदोदंडस्तथैवच सम्यक्प्रयुक्ताःसिध्येयुर्दंडस्त्वगतिकागतिः ३४५

दिभिरुपायैर्वक्ष्यमाणैरनुसंधेयं एवंपुरतःपृष्ठतःपार्श्वतश्चत्रयस्त्रयआत्माचैकइतित्रयोदशराजकमिदंराजमंडलंपद्माकारंपार्ष्णिग्र
हाक्रंदासारादयस्त्वरिमित्रोदासीनेष्वेवानर्भवंति संज्ञाभेदमात्रंग्रंथांतरेदर्शितमितियोगीश्वरेणनपृथगुक्ताः ३४४ सामादिभिरुपक्रमैरि
त्युक्तंइदानींतानुपायानाह सामप्रियभाषणंदानंसुवर्णादेः भेदोभेदकरणं तत्सामंतादीनांपरस्परतोवैरस्योत्पादनं दंडउपांशुप्रकाश-
म्यांधनापहारादिर्वधपर्यंतोपकारः एतेसामादयः परिपंथ्यादिसाधनोपायाः एतेचदेशकालाद्यनुसारेणसम्यक्प्रयुक्ताः सिध्येयुः तेषांच ७०
मध्येदंडस्त्वगतिकागतिः उपायांतरसंभवेसतिनप्रयोक्तव्यः एतच्चपीडनीयकर्शनीयाभिप्रायेण यातव्योच्छेत्तव्योदंड एवमुरव्यः एते

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

सामादयोनकेवलंराजव्यवहारविषयाः अपितुसकललोकव्यवहारविषयाः यथा अधीष्वपुत्रकाधीष्वदास्यामितवमोदकान् यद्वान्यस्मैप्रदास्यामिकर्णमुत्पादयामितेइति ३४५ किंच संधिर्व्यवस्थाकरणं विग्रहोपकारः यानंपरप्रतियात्रा आसनमुपेक्षा संश्रयोबलवदाश्रयणं द्वैधीभावः स्वबलस्यद्विधाकरणं एतान्संधिप्रभृतीन्गुणान्यथावत्देशकालशक्तिमित्रादिवशेनकल्पयेत् ३४६ यानकालानाह यदापरराष्ट्रंसस्येर्व्रीत्यादिभिर्गुणैश्चसमजलेंधनतृणादिभिरुपेतंसंपन्नं शत्रुश्चहीनोबलादिभिः आत्माचतद्दृष्टवाहनपुरुषः वाहनानिहस्त्यश्वादीनितानिचपूरुषाश्चवाहनपूरुषाः तद्दृष्टाः वाहनपूरुषायस्यसतथोक्तः तदापरराष्ट्रमात्मसात्कर्तुव्रजेत् ३४७ प्राणिनामभ्युदयविनिपातानां

संधिंचविग्रहंचैवयानमासनसंश्रयौ द्वैधीभावंगुणानेतान्यथावत्संकल्पयेत् ३४६ यदासम्यगुणोपेतंपरराष्ट्रं तदाव्रजेत् परश्चहीनआत्माचतद्दृष्टवाहनपूरुषः ३४७ दैवेपुरुषकारेचकर्मसिद्धिर्व्यवस्थिता तत्रदैवमधिष्ठायकृपौरुषंपौर्वदेहिकम् ३४८

दैवाधत्तत्वाद्यदिदैवमस्तितदास्वयमेवपरराष्ट्रादिवशीभविष्यति अथनास्तिकृतंपिपौरुषेनभविष्यन्ति अतोव्यर्थएवायंयात्राप्रयासइत्यतआह कर्मसिद्धिः फलप्राप्तिः इष्टानिष्टलक्षणासानकेवलंदैवेव्यवस्थिता अपितुपुरुषकारेपिलोकेनदर्शनात् चिकित्सकादिशास्त्रवैयर्थ्याच्च अपिचपुरुषकाराभावेदैवमेवनास्तीत्याह तत्रदैवमिति यतःपूर्वदेहार्जितंपौरुषमेवदैवमुच्यतेअल्पपुरुषकारानंतरंमहाफलोदयाभिव्यक्तंपौरुषंपौर्वदेहिकंकर्मनस्मात्पुरुषकाराभावेनदैवमस्तीतिपुरुषकारेयत्नोविधातव्यः ३४८

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींमतांतराण्याह केचिदिष्टानिष्टलक्षणंफलंदैवादेवेच्छंति केचित्स्वभावात्स्वयमेवभवति नकारणमपेक्षतइति केचित्कालात्केचित्पुरुषकारतएवेति स्वमतमाह दैवादीनांसंयोगेसमुच्चयेफलंभवतीतिकुशलबुद्धयोमन्यादयोमन्यंते ३४९ एकैकस्मात्फलंनभवतीत्यत्रदृष्टांतमाह नात्रतिरोहितमस्ति ३५० लाभायपरराष्ट्रंगंतव्यमित्युक्तंलाभश्चत्रिविधः हिरण्यलाभोभूलाभोमित्रलाभश्चेति तेषुमित्रलाभोज्यायान् ततस्तत्प्राप्त्युपायेयत्नोविधातव्यः तत्प्राप्त्युपायश्चसत्यवचनमित्याह यस्मात्हिरण्यभूमित्रलाभेभ्योमित्रलब्धिर्वराउत्कृष्टातस्मात्तत्प्राप्त्येय

केचिद्दैवात्स्वभावाद्वाकालात्पुरुषकारतः संयोगेकेचिदिच्छंतिफलंकुशलबुद्धयः ३४९ यथात्येकेनचक्रेणरथस्यनगतिर्भवेत् एवपुरुषकारेणविनादैवंनसिद्ध्यति ३५० हिरण्यभूमिलाभेभ्योमित्रलब्धिर्वरायतः अतोयतेततत्प्राप्तेरक्षेत्सत्यंसमाहितः ३५१ स्वाम्यमात्याजनोदुर्गंकोशोदंडस्तथैवच मित्राण्येताः प्रकृतयोराज्यंसप्तांगमुच्यते ३५२

तेनयत्नंकुर्यात् सामादिभिः सत्यंचरक्षेत् समाहितः सावधानः सत्यमूलत्वान्मित्रलाभस्य ३५१ इदानींराज्यांगान्याह महोत्साहइत्याद्युक्तलक्षणोमहीपतिः स्वामी अमात्यामंत्रिपुरोहितादयः जनोब्राह्मणादिप्रजाः दुर्गंधन्वदुर्गादि कोशः सुवर्णादिधनराशिः दंडोहस्त्यश्वरथपत्तिलक्षणंचतुरंगबलं मित्राणिसहजकृत्रिमप्राकृतानि एताः स्वाम्याद्याः राज्यस्यप्रकृतयोमूलकारणानि एवंराज्यंसप्तांगमुच्यते ३५२ तदेवंविधंराज्यप्राप्यदुर्वृत्तेषुवंचकशठधूर्तपरदारपरद्रव्यापहारिहिंसकादिषुनृपोदंडंपातयेत्प्रयोजयेत् हि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

यस्माद्धर्मएवदंडरूपेणपूर्वंब्रह्मणानिर्मितोस्यचदंडइतियोगिकीसंज्ञा दंडोदमनादित्याहुः तेनादांतान्दमयेदित्यादिगौतमस्मरणात् ३५३ सपूर्वोक्तोदंडोलुब्धेनकृपणेनाकृतबुद्धिनाचंचलबुद्धिनान्यायतोन्यायानुसारेणनेतुप्रयोक्तुंशक्योनभवति कीदृशेनतर्हिशक्यइत्याह सत्यसंधेनाप्रतारकेणशुचिनाजितारिषड्वर्गेणसुसहायेनपूर्वोक्तसहायसहितेनधीमतानयानयकुशलेनसदंडोन्यायतोधर्मानुसारेणनेतुंशक्यः ३५४ सदंडःशास्त्रोक्तमार्गेणप्रयुज्यमानःसनदेवासुरमानवैः सहितंइदंसर्वंजगदानंदयेत् हर्षयेत् अन्यथाशास्त्रातिक्रमेण

तदवाप्यनृपोदंडंदुर्वृत्तेषुनिपातयेत् धर्माद्दिदंडरूपेणब्रह्मणानिर्मितःपुरा ३५३ सनेतुंन्यायतोशक्योलुब्धेना
कृतबुद्धिना सत्यसंधेनशुचिनासुसहायेनधीमता ३५४ यथाशास्त्रप्रयुक्तःसन्सदेवासुरमानवम् जगदानंदये
त्सर्वमन्यथातत्प्रकोपयेत् ३५५ अधर्मदंडनंस्वर्गकीर्तिलोकांश्चनाशयेत् सम्यक्तुदंडनंराज्ञःस्वर्गकीर्तिजयाव
हम् ३५६ अपिभ्रातासुतोर्व्योवाश्वशुरोमातुलोपिवा नादंडोनामराज्ञोस्तिधर्माद्विचलितःस्वकात् ३५७

प्रयुक्तश्चेज्जगत्सर्वं
पयेत् ३५५ नकेवलमधर्मदंडेनजगत्प्रकोपः अपितुप्रयोक्तुरदृष्टादृष्टहानिरपीत्याह यःपुनः शास्त्रातिक्रमेणलोभादिनादंडः कृतःसर्व
पहेतुत्वात्स्वर्गकीर्तिलोकांश्चविनाशयतीति शास्त्रोक्तमार्गेणतुकृतःधर्महेतुत्वात्स्वर्गकीर्तिजयानांहेतुर्भवति ३५६ अर्घोर्घार्हआचार्यादिः शेषंप्रसिद्धं एतेभ्रातृसुतादयोपिस्वधर्माच्चलितादंड्याः किमुतान्ये यतःस्वधर्माच्चलितःअदंड्योनामराज्ञः कोपिनास्ति एतच्चमाता

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

पित्रादिव्यतिरेकेण तथाचस्मृत्यंतरं अदंड्यौमातापितरौस्नातकपरिव्राजकपुरोहितवानप्रस्थाः श्रुतशीलशौचाचारवंतस्तेहिधर्माधिकारिणइति ३५७ किंच यस्तुदंड्यान्स्वधर्मचलनादिनादंडयोग्यान्सम्यक्शास्त्रदृष्टेनमार्गेणधिग्धनदंडादिनादंडयति वध्यान्वधार्हान्घातयतितेनराज्ञाभूरिदक्षिणैः क्रतुभिरिष्टंभवति बहुदक्षिणक्रतुफलंप्राप्नोतीत्यर्थः नचफलश्रवणाद्दंडप्रणयनंकाम्यमितिमंतव्यंअकरणेप्रायश्चित्तस्मरणात् यथाहवसिष्ठः दंडोत्सर्गेराजैकरात्रमुपवसेत् त्रिरात्रंपुरोहितः कृच्छ्रमदंड्यदंडनेपुरोहितस्त्रिरात्रंराजेति

योदंड्यान्दंडयेद्राजासम्यग्वध्यांश्चघातयेत् इष्टंस्यात्क्रतुभिस्तेनसमानवरदक्षिणैः ३५८ इतिसंचिंत्यनृपतिः क्रतुतुल्यफलंपृथक् व्यवहारान्स्वयंपश्येत्सभ्यैः परिवृतोन्वहम् ३५९ कुलानिजातीःश्रेणीश्चगणान्जानपदानपि स्वधर्माच्चलितान्राजाविनीयस्थापयेत्पथि ३६०

३५८ दुष्टेसम्यग्दंडः प्रयोक्तव्यइत्युक्तंदुष्टपरिज्ञानंचव्यवहारदर्शनमंतरेणनभवतीतितत्परिज्ञानायव्यवहारदर्शनमहरहःस्वयंकर्तव्यमित्याह इत्येवमुक्तप्रकारेणक्रतुतुल्यंफलंदंड्येदंडेनस्वर्गादिनाशंचादंड्यदंड्येनसम्यग्विचिंत्यपृथक्पृथग्वर्णादिक्रमेणसभ्यैर्वक्ष्यमाणलक्षणैः परिवृतः प्रतिदिनंव्यवहारान्वक्ष्यमाणमार्गेणदुष्टादुष्टपरिज्ञानार्थंराजास्वयंपश्येत् ३५९ कुलानिब्राह्मणादीनांजातयोमूर्धावसिक्तप्रभृतयः श्रेणयस्तांबूलिकादीनांगणाहेलांबुकादीनांजानपदाःकारुकादयः एतान्स्वधर्माच्चलितान्प्रच्युतान्राजायथापराधंविनीयदंडयित्वापथिस्वधर्मेस्थापयेत् दंडंदुर्वृत्तेषुनिपातयेदि

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

त्युक्तं सचदंडोद्विविधः शारीरोर्थदंडश्चेति यथाह नारदः शारीरस्त्वर्थदंडश्च दंडस्तु द्विविधः स्मृतः शारीरस्ताडनादिस्तु मरणांतः प्र
कीर्तितः काकिण्यादिस्त्वर्थदंडः सर्वस्वांतस्तथैव चेति द्विविधोप्यपराधानुसारेणानेकधा भवति आह स्म शारीरो दशधा प्रोक्तो ह्यर्थदं
डस्त्वनेकधेति ३६० तत्र कृष्णलमाषसुवर्णपलादिशब्दैरर्थदंडा वक्तव्यास्ते च प्रतिदेशं भिन्नपरिमाणार्था इत्येकरूपापराधेपि देशभेदेन
न्यूनाधिकदंडो माभूदिति कृष्णलादिशब्दानां नियतपरिमाणविषयत्वं दंडव्यवहारे दर्शयितुमाह जालकांतरप्रविष्टादित्यरश्मिस्थितं यद्रज
स्तत्त्रसरेणुरित्युक्तं योगीश्वरादिभिस्तत्वदर्शिभिः ते च त्रसरेणवोष्टौ लिक्षा स्वेदजयूकांडं ता लिक्षास्तिस्रो राजसर्षपो राजिका ते राज

जालसूर्यमरिचिस्थं त्रसरेणू रजः स्मृतम् तेष्टौ लिक्षा तु तास्तिस्रो राजसर्षप उच्यते ३६१

सर्षपास्त्रयो गौरसर्षपः सिद्धार्थः गौरसर्षपाः षट्यवो मध्यः मध्यमो न स्थूलो न सूक्ष्मः एते न गौरसर्षपा अपि मध्यमा इति गम्यते त
था राजसर्षपा अपि मध्यमशब्दादेव सर्षपादिशब्दाः न केवलमुन्मानवचनाः किंतु तदुन्मि तद्रव्यवचना इति गम्यते यथा प्रस्थपरिमिता
यवाः प्रस्थ उच्यंते एवं सर्षपाद्युन्मितं द्रव्यं सर्षपादिशब्दैः सर्षपादिशब्दानां च केवलोन्मानवचनत्वे त्रसरेणूनुपसंहृत्योन्मातुमशक्यत्वा
त्तद्द्वारेण कृष्णलादिव्यवहारो न स्यात् तत्र स्थूलस्थूलतरस्थूलतमसूक्ष्मसूक्ष्मतरसूक्ष्मतममध्यसर्षपाद्युन्मानभेदेन प्रतिदेशं व्यवहार
भेदे स्थिते दंडव्यवहारे मध्य इति नियम्यते ते मध्यमा यवास्त्रय एकः कृष्णलः ते कृष्णलाः पंचैको माषः ते माषाः षोडशैकः सुवर्णः ते सुव

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

र्णाश्चत्वारः पलमितिसंज्ञाः कथिताइति पंचवापिपलंप्रकीर्तितंनारदादिभिः तत्रस्थूलैस्त्रिभिर्यवैः कृष्णलपरिकल्पनायांव्यावहारिक निष्कस्यषोडशांशाः कृष्णलोभवति तैः पंचभिर्माषः माषैःषोडशभिः सुवर्णः सचव्यावहारिकैः पंचभिर्निष्केरेकः सुवर्णोभवति तेचत्वारः पलमिति निष्काणांविंशतिः पलं यदातुसूक्ष्मैस्त्रिभिर्यवैः कृष्णलः परिकल्प्यते तदाव्यावहारिकनिष्कस्यद्वात्रिंशत्तमोभागः कृष्णलो भवति तस्मिन्पक्षेसुवर्णः सार्धनिष्कद्वयंभवति पलंचदशनिष्कंयदातुमध्यमयवैः कृष्णलपरिकल्पनातदानिष्कस्यतदाविंशतितमो

गौरस्तुतेत्रयःषट्तेयवोमध्यस्तुतेत्रयः कृष्णलःपंचतेमाषस्तेसुवर्णस्तुषोडश पलंसुवर्णाश्चत्वारः पंचवापिप्रकीर्तितम् ३६२ द्वेकृष्णलेरूप्यमाषोधरणंषोडशैवते शतमानंतुदशभिर्धरणैः पलमेव तु ३६३

भागः कृष्णलः सुवर्णश्चतुर्निष्कः षोडशनिष्कंपलं एवंपंचसुवर्णंपलमितिपक्षेविंशतिनिष्कंपलम् एवमन्यदपिनिष्कस्यचत्वारिंशोभागः कृष्णलः हिनिष्कःसुवर्णोष्टनिष्कंपलंइत्यादिलोकव्यवहारानुसारेणास्मादेवसूत्राद्वूहनीयं ३६१ ३६२ एवंसुवर्णस्योन्मानंप्रतिपाद्येदानींरजतस्याह द्वेकृष्णलेपूर्वोक्तेरूप्यमाषोरूप्यसंबंधीमाषः तेरूप्यमाषाः षोडशधरणंपुराणइत्यस्यैवसंज्ञानत्वम् तेषोडशस्याद्धरणंपुराणश्चैवराजतइतिमनुस्मरणात् दशभिर्धरणैः शतमानंपलमितिचाभिधीयते पूर्वोक्ताश्चत्वारः सुवर्णाएकोराजतोनिष्कोभवति ३६३

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इदानींताम्रस्योन्मानमाह पलस्यचतुर्थोंशः कर्षइतिलोकप्रसिद्धः कर्षेणोन्मितः कार्षिकः ताम्रस्यविकारस्ताम्रिकः कर्षसंमितस्ताम्रवि
कारः पणसंज्ञोभवति कार्षापणसंज्ञकश्च कार्षापणस्तुविज्ञेयस्ताम्रिकः कार्षिकः पणइतिमनुवचनात् पंचसुवर्णपलपक्षेविंशतिमाषः
पणोभवति तथासतिमाषोविंशतिमोभागः पणस्यपरिकीर्तितइत्यादिव्यवहारः सिद्धोभवति चतुःसुवर्णपलपक्षेतुषोडशमाषः पणोभव
ति अस्मिंश्चपक्षेसुवर्णकार्षापणपणशब्दानांसमानार्थत्वेपिपणकार्षापणशब्दौताम्रविषयावेव एवंतावद्धेमरूप्यताम्राणामुन्मानमुक्तं
दंडव्यवहारोपयोगित्वात् कांस्यरीतिकादीनामपिलोकव्यवहारांगभूतानामेवोन्मानंद्रष्टव्यम् ३६४ स्वशास्त्रपरिभाषामाह पणानांसह-

निष्कंसुवर्णाश्चत्वारः कार्षिकस्ताम्रिकःपणः ३६४ साशीतिःपणसाह
स्रोदंडउत्तमसाहसः तदर्धंमध्यमःप्रोक्तस्तदर्धमधमःस्मृतः ३६५

स्रंपणसाहस्रंतत्परिमाणमस्येतिपणसाहस्रः अशीत्यासहवर्ततइतिसाशीतिः अशीत्यधिकपणसहस्रपरिमितोयोदंडः सउत्तमसा
हससंज्ञोवेदितव्यः तदर्धंमध्यमः तस्यसाशीतिपणसाहस्यार्धंचत्वारिंशदधिकपणपंचशतपरिमितोदंडोमध्यमसाहससंज्ञः तदर्धमध
मः तस्यचत्वारिंशदधिकपंचशतपणस्यार्द्धंसप्तत्यधिकपणशतद्वयपरिमितोदंडोधमसाहससंज्ञः स्मृतउक्तोमन्वादिभिः यत्तुपणानांद्वे
शतेसार्धेप्रथमःसाहसः स्मृतः मध्यमः पंचविज्ञेयःसहस्रंत्वेवचोत्तमइतिमनुनोक्तं तत्पक्षांतरममतिपूर्वापराधविषयंद्रष्टव्यम् ३६५

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

दंडभेदानाह धिग्दंडोधिक्कृधिगितिकुत्सनं वाग्दंडस्तुपरुषशापवचनात्मकः धनदंडोधनापहारात्मकः वधदंडः शारीरोबंधरोधादिर्जीवितं
तः एतेचतुर्विधादंडाः व्यस्ताएकैकशः समस्ताः द्वित्राः त्रिचतुरोवाअपराधानुसारेणप्रयोक्तव्याः उक्तक्रमेणपूर्वपूर्वासाध्येउत्तरउत्तरः प्रयो
क्तव्यः यथाहमनुः धिग्दंडंप्रथमंकुर्याद्वाग्दंडंतदनंतरं तृतीयंधनदंडंतुवधदंडमतःपरमिति ३६६ दंडव्यवस्थानिमित्तान्याह यथापराधं
ज्ञात्वातदनुसारेणदंडप्रणयनमेवंदेशकालवयः कर्मवित्तानिज्ञात्वातदनुसारेणदंड्येषुदंडार्हेषुदंडप्रणयनंकुर्यात् तथाबुद्धिपूर्वाबुद्धिपू

धिग्दंडंस्त्वथवाग्दंडोधनदंडोवधस्तथा योज्याव्यस्ताःसमस्तावात्मपराधवशादिमे ३६६
ज्ञात्वापराधंदेशंचकालबलमथापिवा वयःकर्मचवित्तंचदंडंदंड्येषुपातयेत् ३६७

र्वसकृदावृत्यनुसारेणच यद्यपिराजानमधिकृत्यायंराजधर्मकलापउक्तस्तथापिवर्णांतरस्यापिविषयमंडलादिपरिपालनाधिकृतस्या
यंधर्मोवेदितव्यः राजधर्मान्प्रवक्ष्यामियथावृत्तोभवेन्नृपइत्यत्रपृथङ्नृपग्रहणात्करग्रहणस्यरक्षार्थत्वाच्चरक्षणस्यदंडप्रणयनायत्तत्वा
दिति ३६७ इतिश्रीपद्मनाभभट्टोपाध्यायात्मजस्यश्रीमत्परमहंसपरिव्राजकविज्ञानेश्वरभट्टारकस्यकृतौऋजुमिताक्षरायांयाज्ञव
ल्क्यधर्मशास्त्रविवृतौसदाचारः प्रथमोध्यायः समाप्तः ७ ७ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

उत्तमोपपदस्येयंशिष्यस्यकृतिरात्मनः धर्मशास्त्रस्यविवृतिर्विज्ञानेश्वरयोगिनः १ अस्मिन्नध्यायेप्रकरणानि उपोद्घातप्रकरणं १ ब्र
ह्मचारिप्रकरणं २ विवाहप्रकरणं ३ जातिविवेकप्रकरणं ४ गृहस्थधर्मप्रकरणं ५ स्नातकप्रकरणं ६ भक्ष्याभक्ष्यप्रकरणं ७ द्रव्यशुद्धिप्र
करणं ८ दानधर्मप्रकरणं ९ श्राद्धप्रकरणं १० गणपतिकल्पः ११ शांतिप्रकरणं १२ राजधर्मप्रकरणं १३ एवंत्रयोदशप्रकरणानि इति
याज्ञवल्क्यमुनिशास्त्रगताविवृतिर्नकस्यविहिताविदुषः प्रमिताक्षरापिविपुलार्थवतीपरिषिंचतिश्रवणयोरमृतं १ ७

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

इतिमिताक्षरा[illegible]हितयाज्ञवल्क्यस्मृतेराचाराभिधःप्रथमाध्यायःसमाप्तः

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

[OrderDescription]
,CREATED=10.06.20 13:01
,TRANSFERRED=2020/06/10 at 13:11:35
,PAGES=85
,TYPE=STD
,NAME=S0003110
,Book Name=M-2901-RACHARABHIKCHH
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF
,FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF
,FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF
,FILE76=00000076.TIF

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection

FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,

CC-0. In Public Domain.Kavikulguru Kalidas Sanskrit University Ramtek Collection